

...महाराङ्का

...पूः

प्रणेता —

कविकुलकुमुदकलाधरः

स्वर्गीय रामस्वामिशास्त्री,

चौरैयूरः, त्रिचिनापल्लीवास्तव्यः

प्रकाशक —

पं० कालीप्रसादत्रिपाठी, अध्यक्षः,


संस्कृत-कार्यालयः, अयोध्या।



भूमिका

सत्स्वपि 'वाक्यं रसात्मकं काव्यम्' 'रमणीयार्थप्रतिपादकः शब्दः काव्यम्' 'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि' इत्यादिकाव्यलक्षणेषु वयं परमास्वाद्यव्यञ्जकत्वरूपलक्षणस्य विद्यमानत्वात् सहृदयहृदयाह्लादजनकं काव्यमित्येव मन्यामहे। तच्च श्रव्यदृश्यभेदाद् द्विधा। तत्र वाचनश्रवणसमकालमेव रसिकजनमनस्सु यदाह्लादजननपूर्वकं चमत्कारं जनयति तत् श्रव्यम्, यच्च धीरोदात्तगुणान्वितपुरुषचरितचर्चितं प्रत्यक्षमभिनीय प्रदर्शितमाह्लादयति तद् दृश्यन्नाम काव्यम्। एतदेव दशविधन्नाटकन्नाम। श्रव्यकाव्यञ्चापि पद्यगद्यगद्यपद्यमयं त्रिविधम्। तत्र 'गद्यपद्यमयं काव्यञ्चम्पूरित्यभिधीयते' इति साधारणलक्षणस्य पञ्चतन्त्रहितोपदेशादिषु व्याप्तिं वारयितुमुदात्तनायकोपेतामेव चम्पूं प्रशंसामः।

उदात्तनायकोपेता
गुणवद्वृत्तमुक्तका।
चम्पूश्च हारयष्टिश्च
केन न क्रियते हृदि॥



भूमिका

सत्स्वपि 'वाक्यं रसात्मकं काव्यम्' 'रमणीयार्थप्रतिपादकः शब्दः काव्यम्' 'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि' इत्यादिकाव्यलक्षणेषु वयं परमास्वाद्यव्यञ्जकत्वरूपलक्षणस्य विद्यमानत्वात् सहृदयहृदयाह्लादजनकं काव्यमित्येव मन्यामहे। तच्च श्रव्यदृश्यभेदाद् द्विधा। तत्र वाचनश्रवणसमकालमेव रसिकजनमनस्सु यदाह्लादजननपूर्वकं चमत्कारं जनयति तत् श्रव्यम्, यच्च धीरोदात्तगुणान्वितपुरुषचरितचर्वितं प्रत्यक्षमभिनीय प्रदर्शितमाह्लादयति तद् दृश्यन्नाम काव्यम्। एतदेव दशविधन्नाटकन्नाम। श्रव्यकाव्यञ्चापि पद्यगद्यगद्यपद्यमयं त्रिविधम्। तत्र 'गद्यपद्यमयं काव्यञ्चम्पूरित्यभिधीयते' इति साधारणलक्षणस्य पञ्चतन्त्रहितोपदेशादिषु व्याप्तिं वारयितुमुदात्तनायकोपेतामेव चम्पूं प्रशंसामः।

उदात्तनायकोपेता
गुणवद्वृत्तमुक्तका।
चम्पूश्च हारयष्टिश्च
केन न क्रियते हृदि॥

संस्कृतसाहित्ये कालक्रमादिमे—त्रिविक्रमभट्टस्य नलचम्पूः सोमदेवसूरेर्यशस्तिलकचम्पूः भोजस्य चम्पूरामायणम्, वरदाम्बिकाया वरदाम्बिकापरिणयं, कर्णपूरकवेरानन्दवृन्दावनचम्पूः जीवगोस्वामिनो गोपालचम्पूः, शेषश्रीकृष्णस्य पारिजातहरणचम्पूः, नीलकण्ठदीक्षितस्य नीलकण्ठचम्पूः, वेङ्कटाध्वरेर्विश्वगुणादर्शचम्पूः हस्तिगिरिचम्पूश्च, अनन्तकवेश्चम्पूभारतम्, रामस्वामिशास्त्रिणो रुक्माङ्गदचम्पूरिति चम्पूग्रन्थाः प्रसिद्धाः। एषु नलचम्पूं सर्वप्रथमं भोजराजः सरस्वतीकण्ठाभरणे 'पर्वतभेदि पवित्रम्' ६—२९ इतिश्लोकोद्धारेण सस्मार। इत्थं भोजात् पुरातनस्त्रिविक्रमभट्ट एवाधुना प्रथमचम्पूनिर्माणकर्तृत्वेन सम्मान्यते। इदानीं काव्येतिहासरसिकानां तोषाय चम्पूलेखकानां संक्षिप्तेतिवृत्तं विद्वद्वृत्तस्य खण्डत्रयाणामाधारेण लिख्यते—

त्रिविक्रमभट्टः

अयं शाण्डिल्यगोत्रस्य श्रीधरस्य पुत्रो देवादित्यस्य च पौत्रः ख्रिस्तस्य दशमशतकारम्भे राष्ट्रकूटवंशीयद्वितीयकृष्णपौत्रस्य, जगत्तुङ्गपुत्रस्येन्द्रराजस्य सभायां पण्डित आसीत्। एत—त्कृता नलचम्पूरपूर्णा। साऽऽरम्भादेवैतादृशीति जनश्रुतिरेका कथ्यते—

एकदाऽस्य पिता ग्रामान्तरं गतः। राज्ञः सभायामधुनैव कश्चिद्विद्वानागतः। तेन सह शास्त्रार्थं कर्तुं श्रीधर आहूतः। तदभावे वृत्तिच्छेदभिया त्रिविक्रमः सन्देशहरमुवाच सद्य एवागच्छामीति विद्यया रहितोऽपि, बालोऽपि। गते तस्मिन् पूजागारं प्रविश्य पित्रा प्रसादितां भगवतीं सरस्वतीं पित्रागमनं यावत् स्वस्मिन् कृपां कर्तुमभ्यर्थयाञ्चकार। भगवती स्वभक्तबालके कृपाञ्चकार। स राजसभामुपेत्य तमागतं पण्डितं शास्त्रार्थे जिगाय। राज्ञा सम्मानितः पौरैरभिनन्दितश्च त्रिविक्रमभट्टो गृहमागत्य नलचम्पूलेखनं प्रारेभे। अधुना यत्र ग्रन्थसमाप्तिस्तत्र लेखनक्षण एव, वाक्यविषयापूर्तिकाल एव तत्पिता आजगाम। सरस्वती तच्छरीरात्तत्क्षणमेव प्रतस्थे। ग्रन्थोऽपूर्णस्तस्थौ। त्रिविक्रमः पुनः साधारणो बालकोऽभूत्। तद्रचनाः—

प्रसन्नाः कान्तिहारिण्यो नानाश्लेषविचक्षणाः।
भवन्ति कस्यचित्पुण्यैर्मुखे वाचो गृहे स्त्रियः॥

अन्योन्यस्य लयं भयादिव महाभूतेषु यातेष्वलं,
कल्पान्ते परमेक एव स तरुः स्कन्धोच्चयैर्जृम्भते।
विन्ध्यस्य त्रिजगन्ति कुक्षिकुहरे देवेन यस्यास्यते,
शाखाग्रे शिशुनेव सेवितजलक्रीडाविलासालसम्।

पर्वतभेदि पवित्रं जैत्रं नरकस्य बहुमतं गहनम्।
हरिमिव हरमिव हरिमिव सुरसरिदम्भः पतन्नमत॥

कल्लोलवेल्लितदृषत्परुषप्रहारै
रत्नान्यमूनि मकरालय मावमंस्थाः।
किं कौस्तुभेन विहितो भवतो न नाम
याञ्चाप्रसारितकरः पुरुषोत्तमोऽपि ॥

सोमदेवसूरिः

अयं जैनः। ख्रिस्तस्य दशमे शतके जातः। अनेन स्वपरमगुरोर्यशोधरस्य जीवनचरितमलेखि यशस्तिलकचम्पौ। ग्रन्थे जीवनचरितवर्णनेन सह जैनधर्मस्य व्यापकं महत्त्वमप्यवर्णि।

भोजः

अयं धारानगर्या अधिपतिः ख्रिस्तस्यैकादशे शतके जातः। अस्य पिता सिन्धुराजः पितृव्यश्च मुञ्ज इति। भोजस्यैकं दानपत्रमधुनापि प्राप्यते यत् १०७८ विक्रमाब्देऽलेखि। अयमनेकग्रन्थैः सह रामकथात्मकं प्रचुरपाण्डित्यपूर्णं चम्पूरामायणम् लेखि। एतद्रचनानिदर्शनमेतत्—

दुःखे सुखे च रज एव बभूव हेतुः,
तादृग्विधे महति गौतमधर्मपत्न्याः।
यस्माद् गुणेन रजसा विकृतिं गता सा,
रामस्य पादरजसा प्रकृतिं प्रपेदे ॥

आबालवृद्धमनुगच्छति रामभद्र—
मेषा पुरी तदिह मा खलु निर्गुणा स्याम्।
इत्यादरादिव धरा बहुधा विधाय,
धूलिच्छलान्निजतनुं तमनुप्रतस्थे ॥
भ्रमत्संसारचक्राग्रधाराधारामिमां श्रियम्।
प्राप्य ये न ददुस्तेषां पश्चात्तापः परं फलम् ॥

वरदाम्बिका

विजयनगराधिपतेर्महाराजबुक्कस्य स्नुषा, महाराजकम्पनस्य पत्नी गंगामधुरवाण्योः सपत्नी महासंस्कृतकवयित्र्योर्वरदाम्बिकेति श्रूयते। बुक्कस्य सिंहासनारोहणकालः १३३६ ख्रिस्ताब्द इति स एव कालस्तस्या अपि ज्ञेयः। स्वविवाहं पुरस्कृत्य वरदाम्बिकयोः परिणयं लिलेख।

कर्णपूरः

चैतन्यचरितामृतमहाकाव्ये कर्णपूररचिते कवेरस्य परिचय इत्थं वर्तते। अयं परमानन्ददासनामा वैद्यशिवानन्दस्य काञ्चनपत्न्यां जन्म लेभे। एकदा महाप्रभुश्चैतन्यो बालकस्यास्य मुखे पादाङ्गुष्ठं स्थापयाञ्चकार। एतेन कर्मणा जागर्तिमाप्ताऽस्य सरस्वती। स सहसैनं श्लोकं पपाठ—

श्रवसोः कुवलयमक्ष्णो—
रञ्जनमुरसो महेन्द्रमणिदाम।

वृन्दावनतरुणीनां
मण्डनमखिलं हरिर्जयति ॥

सर्वप्रथमं 'श्रवसोः कुवलयम्' इत्याकर्ण्य कर्णाभरणवाचकं महाप्रभुरस्य नाम सर्वप्रथमं प्रकटितजिह्वास्फुटशब्दस्य कर्णपूर इति चकार। अयं महाप्रभोः शिष्यस्तत्समकालिकः १५०७ शकाब्दे आसीत्। एतद्वंशजा अधुनाऽपि वङ्गीयनदियामण्डलस्य कचड़ापाड़ाग्रामे विद्यन्ते इत्याह विद्वद्वृत्तम्। एतत्कृत आनन्दवृन्दावनचम्पूरत्युत्तमो ग्रन्थः प्रकृष्टपाण्डित्यकवित्वपूर्णः। एतद्रचनानिदर्शनमेतत्—

शोणस्निग्धांगुलिदलकुलं जातरागं परागैः,
श्रीराधायाः स्तनमुकुलयोः कुंकुमक्षोदरूपैः।
श्रद्धामधुनखमहःपुञ्जकिञ्जल्कजालं,
नालं चरणकमलं पातु नः पूतनारेः॥

क्षोभं क्षोणीमृगादृशः स्थगनमिह
रवेः कम्पमाशावधूनां,
स्तम्भं वातस्य कुर्वन्नमरपरिबृढ-
स्यास्त्रमक्ष्णां सहस्रे।

स्वेदं सप्तर्षिगोष्ठ्याः परमरस-
मयोल्लासमौत्तानपादे
र्ध्यानध्वंसं विरिञ्चेः स जयतु
भगवत्कीर्तनानन्दनादः॥

आनन्दवृन्दावनचम्पोरन्तिमश्लोकेन 'राधासरस्तीर—कुटीरवर्तिन' इत्यनेन ज्ञायते यदयं वृन्दावनस्थ राधासरस्तटेऽन्तिमे जीवने निवसति स्म। मथुरायाः श्यामलाल उक्तग्रन्थस्योपोद्घाते वदति आनन्दवृन्दावनचम्पूविषये—

'एषा सुप्रसिद्धजहांगीरमहीमहेन्द्रसभारत्नस्य पारसीक (यावनी) प्रभृतिविविधविद्यापारावारपारीणस्य अगाधशब्दसागरावगाहनोपार्जितान्यत्रदुर्लभपदरत्नखचिततभगवच्चित्रचरित्रभक्तजनकण्ठाभरणस्य अवतारभूतस्य श्रीकर्णपूरकवेः कृतिः' इति

जीवगोस्वामी

गोपालचम्पूकाव्यनिर्मातुर्जीवगोस्वामिनः रूपसनातनगोस्वामिनौ पितृव्यौ स्तः। अयं ख्रिस्तस्य सप्तदशशतकस्य पूर्वभागे जातः। वृन्दावनस्थश्रीराधादामोदरमन्दिरमनेन प्रतिष्ठापितम्। श्रीकृष्णचरितामृते ख्रिस्तस्य सप्तदशशतकान्ते जातेन श्रीकृष्णदासेनास्य महती प्रशंसा कृता। एकदा स्नानं कृत्वा यमुनायां सन्ध्यामसम्पाद्य तस्मात् प्रत्यावर्तन्तमेनमवेक्ष्य कश्चित्पप्रच्छ जीवगोस्वामिनं—सन्ध्यां कथन्न करोषि ? तत्क्षणमयमुवाच

हृदाकाशे चिदानन्दं मुदा भाति निरन्तरम्।
उदयास्तं न पश्यामः कथं सन्ध्यामुपास्महे॥

सद्बक्तिदुहिता जाता मायाभार्या मृताधुना ।
अशौचद्वयमाप्नोति कथं सन्ध्यामुपास्महे ॥

गोपालचम्पूर्गौडीयसमाजेऽतिप्रसिद्धा वर्तते । अत्रत्याः श्रीकृष्णस्य बाललीला अधीत्य को न भवति मुदितः ?

शेषकृष्णः

शेषोपनामको नृसिंहसूनुरयम् । श्रीकृष्णकविर्महाराष्ट्रदेशीयः खिस्ताब्दीयषोडशशतकोत्तरभागे वाराणस्यामकबरबादशाहराज्यसमय आसीत् । अयं काशीसमीपवर्तिताण्डवदुरनृपानुजन्मनो नरोत्तमस्याभ्यर्थनया पारिजातहरणचम्पूश्चकार । एतद्रचनानिदर्शनम्...

अमृतं किरति हिमांशुर्विषमेव फणी समुद्गिरति ।
गुणमेव वक्ति साधुर्दोषमसाधुः प्रकाशयति ॥
स्नेहप्रस्नुतपीवरस्तनभरप्राग्भारभूरिक्षर—
त्क्षीरक्षालनपिच्छलैः प्रतिपदं मार्गैर्निषिद्धत्वराः ।
हर्षोत्तुच्छयमानतर्णकरवोत्कर्णा व्रजायोत्सुका
गोषङ्घाः प्रतिहुङ्कृतैरिह मुहुः श्रोत्रोत्सवं कुर्वते ॥

अनायका विनश्यन्ति नश्यन्ति बहुनायकाः ।
स्त्रीनायका विनश्यन्ति नश्यन्ति शिशुनायकाः ॥

नीलकण्ठाध्वरिः

अयं विख्यातविदुषोऽप्पय्यदीक्षितस्य पुत्रः खिस्तस्य सप्तदशे शतकेऽभूत् द्रविडदेशे । परमशैवेनानेनानेके यज्ञाः कृता यत्फलस्वरूपं सर्वस्ववेदीत्युपाधिनाऽयमलङ्कृतोऽभूत् । नीलकण्ठविजयचम्पौ भगवतः शिवस्य कथा वर्णिता अनेन । एतद्रचना—

वाणीनिकेततनयाघनसारगौराः,
कल्हारकेशररुचः कमलानुषङ्गात् ।
मातर्जयन्ति शरणागतलोकचेतो-
मालिन्यमार्जनवशादसिताः कटाक्षाः ॥

वेङ्कटाध्वरिः

अयं विश्वगुणादर्शहस्तिगिरिचम्प्वोः कर्ता श्रीरामानुजाचार्यमतानुयायी रघुनाथदीक्षितपुत्रः, अप्पय्यगुरोः पौत्रः खिस्तस्य सप्तदशे शतके नीलकण्ठाध्वरिसहाध्यायी जातः । एतत्कृतविश्वगुणादर्शचम्पोः पठनमावश्यकं संस्कृतज्ञैरित्येवोक्त्वा तद्रचनानिदर्शनं स्थाप्यते ...

कंसं ध्वंसयते मुरं तिरयते हंसं तथा हिंसते.
बाणं क्षीणयते वकं लघयते पौण्ड्रं परं लुम्पते ।
भौमं क्षामयते बलाद् बलभिदो दर्पं पराकुर्वते,
क्लिष्टं शिष्टगणं प्रणम्रमवते कृष्णाय तुभ्यं नमः ॥

सुशोभनक्रमकरैः सेवितो जीवनार्थिभिः ।
मध्यस्थवाहवो राजत्यान्ध्रदेशो नदीशवत् ॥

अनन्तकविः

अयं चम्पूमहाभारतस्य कर्ता । एतद्ग्रन्थस्यापि सौष्ठवं पठनादेव ज्ञायते । इत्थमनुभूयते यद् हिन्द्यादिप्रान्तीयभाषासु ये महाभारतग्रन्थाः प्राप्यन्ते तेऽस्यैवानुवादप्रायाः ।

रामस्वामिशास्त्री

अयमेव रुक्माङ्गदचम्पूकर्ता । एतत्कन्यायाः कन्यापुत्रस्त्रिचनापल्लीमण्डलान्तर्गतवोरैयूरनिवासी श्री आ० रा० मलैयप्पः प्रायो द्वित्रवर्षपूर्वमस्मत्कार्यालयमागत आसीत् । तत्कृपयैव श्रीरामस्वामिशास्त्रिणो रचनाः संस्कृतपत्रे प्रकाशिता अद्य पुस्तकाकारे प्रकाश्यन्ते ।

श्रीरामस्वामिशास्त्री पुस्तकस्यास्य ६२ पृष्ठे लिखति 'लालगुडी नगरीव प्रवृद्धश्रीमत्युपेता' इति । एतट्टिप्पण्यां श्री आ० रा० मलैयप्पो लिखति—

"लालगुडीनगरी दक्षिणभारते त्रिचनापल्लीजिल्लान्तर्गता काचन पुरी । ग्रन्थकर्तुरस्य जन्मभूमिर्वासभूमिश्च इयमेव । अत्रस्थे शिवालये प्रवृद्धश्रीमत्याह्वया अम्बिका विराजतेतराम् । इयं ग्रन्थकर्तुः कुलदेवता च भवति । अत एव स्वपुत्रीष्वन्यतमां मम मातामहीं प्रवृद्धश्रीमत्याह्वामकरोत् " इति । ख्रिस्तस्याष्टादशशतकेऽयमभूदिति प्रतीयते । चम्पूग्रन्थेषु प्रायोऽयमेवान्तिमो भवितुमर्हति ।

जीवन्धरचम्पूः

जैनाचार्यश्रीआत्मानन्दजन्मशताब्दिस्मारकग्रन्थस्य हिन्दिविभागे १४० पृष्ठे जीवन्धरचम्पूरित्येकश्चम्पुग्रन्थः पठ्यते किन्तु तद्विषये न किञ्चिदपि ज्ञायते, परमियं कृतिः कस्यचिज्जैनविदुष एवेति जैनसंस्कृतविद्वल्लिखितसंस्कृतग्रन्थसूच्यामेतद्ग्रन्थनामोद्धरणाद् वक्तुं शक्यते ।

अयमेव संस्कृतसाहित्ये चम्पूकाव्यनामितिहासः । प्राचीनपुस्तकानां संग्रहालयेषु अन्ये चम्पूग्रन्था न भविष्यन्तीति न वक्तुं शक्यते । सम्भाव्यते समये तेषामप्युद्धारः ।

चम्पूकथामूलम्

काञ्चिदपि कथां तन्नायकनैसर्गिकभावसंरक्षणपूर्वकं कविः स्वेच्छया परिवर्त्य, परिवर्ध्य लिखितुं शक्नोति। एतस्मिन् चम्पुकाव्येऽपि कौशलमेतादृशं दृश्यते। पद्मपुराणे भूमिखण्डे २२ अध्याये ऐन्द्रे सुव्रतोपाख्याने व्याख्यातं धर्माङ्गदस्य चरितं तत्पितुर्महाराजरुक्माङ्गदस्यापि संक्षिप्तं चरितं प्रकटयति। तत्र चम्पुगताः सर्वाः कथा न सन्ति। तथापि विशिष्टास्ताः पद्मपुराणश्लोकेषु सूचिता अपीति ग्रन्थस्यास्याध्यापनं,पठनं मननञ्च पुराणवदेव भवितुमर्हति।

पद्मपुराणे भगवान् व्यासो ब्रह्माणं पृच्छति यत् सुव्रतनामेन्द्रः पूर्वजन्मनि कस्यां जातो, कुतः, कदा, कुत्र, किन्नामा चाभूत ?

एतदुत्तरे भगवान् ब्रह्मदेवो वदति रुक्माङ्गदस्य पुत्रो धर्माङ्गदो वासवो भूत्वा दिव्यान् भोगानुपभुज्य तत्पदाच्च्यावितः पुनः सोमशर्मणो गृहे जातः सुव्रतनामा भूत्वा ऐन्द्रं पदं प्राप। धर्माङ्गद आद्ये कृतयुगे विदिशायां (ग्वालियरराज्यवर्तिन्यां वर्तमानभेलसायां) जात इति। अत्र पद्मपुराणवाक्यान्युद्ध्रियन्ते।

व्यास उवाच

प्रश्नमेकं महाभाग करिष्ये साम्प्रतं वद।
त्वयैव पूर्वमुक्तं हि सुव्रतं च प्रतीश्वरम् ॥१॥

पूर्वाभ्यासेन संध्यायन्नारायणमनामयम्।
कस्यां जात्यां समुत्पन्नः सुव्रतः पूर्वजन्मनि ॥२॥

तन्मे त्वं साम्प्रतं ब्रूहि कथमाराधितो हरिः।
अनेनापि स देवेश कोऽयं पुण्यसमाविलः ॥३॥

ब्रह्मोवाच

वैदिशे नगरे पुण्ये सर्व-ऋद्धिसमाकुले।
तत्र राजा महातेजा ऋतध्वजसुतो बली ॥४॥

तस्यात्मजो महप्राज्ञो रुक्मभूषणविश्रुतः।
सन्ध्यावली तस्य भार्या धर्मपत्नी यशस्विनी ॥५॥

तस्यां पुत्रं समुत्पाद्य स आत्मसदृशं ततः।
तस्य धर्माङ्गदं नाम चकार नृपनन्दनः ॥६॥

सर्वलक्षणसम्पन्नः पितृभक्तिपरायणः।
रुक्माङ्गदस्य तनयो योऽयं भगवतां वरः ॥७॥

पितुः सौख्याय येनापि मोहिन्यै तु शिरो ददे ।
वैष्णवेन च धर्मेण पितृभक्त्या तु तस्य हि ॥८॥

सुप्रसन्नो हृषीकेशः सकायो वैष्णवं पदम् ।
नीतस्तु सर्वधर्मज्ञो वैष्णवः सात्वतां वरः ॥९

धर्माङ्गदो महाप्राज्ञः प्रज्ञाज्ञानविशारदः ।
तत्रस्थो वै महाप्राज्ञो धर्मोऽसौ धर्मभूषणः ॥१०

दिव्यान्मनोऽनुगान् भोगान् मोदमानः प्रभुञ्जति ।
पूर्णे युगसहस्रान्ते धर्मो वै धर्मभूषणः ॥११॥

तस्मात् पदात् परिभ्रष्टो विष्णोश्चैव प्रसादतः ।
सुव्रतो नाम मेधावी सुमनानन्दवर्द्धनः ॥१२॥
सोमशर्मख्यितनयः श्रेष्ठो भगवतां वरः ।

× + + ×

व्यास उवाच

धर्माङ्गदो महाप्राज्ञो रुक्माङ्गदसुतो बली ।
आद्ये कृतयुगे जातः सृष्टिकाले स वासवः ॥३७॥

+ × + ×

पूर्वकल्पे महाभागो यथा रुक्मांगदो नृपः ।
तथा धर्माङ्गदश्चायं सञ्जातः ख्यातिमान् द्विजः ॥५५॥

यथा धर्माङ्गदो वीरः प्रभुञ्जति महत्पदम् ।
एवं वेदाश्च देवाश्च पुराणाः स्मृतिपूर्वकाः ॥४७॥

एतद्भूमिकायां ग्रन्थगतसौष्ठवनिदर्शनमावश्यकमासीत् परं बहुकार्यभारभुग्नस्य मादृशस्य कृते तत्कार्यं कठिनं सम्वृत्तम् । यद्यपि श्रीमलैयप्पामहोदयेन टिप्पणीलेखनप्रयासः कृतः परमनेकविषमस्थलानि तद्वञ्चितान्येवातिष्ठन् । सत्या वार्त्तेयमस्ति यद् यद्यस्य ग्रन्थस्यैका सरला टीका भवेत्तर्हि परीक्ष्यग्रन्थेष्वयं स्थापितुं योग्यः । एतदध्ययनाद् बालकानां मनस्सु कश्चिद् दुष्प्रभावो न पतितुमर्हतीति मे प्रत्ययः ।

एतद्ग्रन्थस्योत्तरवृत्तमपि लिखितं येन तच्छोभावृद्धिरेव भवितुमर्हति । रुक्माङ्गदमहाराजस्य पुत्र इन्द्रोऽभूदिति वृत्तमपि पद्मपुराणान्निस्सृतम् । इत्थमस्य ग्रन्थस्योपादेयतायाऽनुमीयते । ग्रन्थमेनमधीत्यैकादश्युपवासो यदि हिन्दुषु प्रचलितः स्यात्तर्हि ग्रन्थकर्तुः प्रयासः सफलः स्यात् । एतद्ग्रन्थाध्येतॄणां भगवान् मङ्गलं विदध्यादित्याशीर्वादं प्रयच्छति—

विदुषां वशम्वदः—

संस्कृतकार्यालयः अयोध्या
ज्येष्ठगङ्गादशहरा २००५ वि० } पं० कालीप्रसादशास्त्री
संस्कृतसम्पादकः

विषयसूची

रुक्मांगदचम्पूः

भद्राणि द्राक् दन्तित्रयंस्स कुर्यादाश्चर्याणामालयो नः पृथूनाम् ।
यस्सञ्जातः पञ्चवक्त्राच्छिवायां सेवन्ते यं सादरं देवसिद्धाः ॥
सीतानेता प्रदाता नतजनततये सर्वनिर्वाणपङ्क्ते
र्हारी मारीचदारी शतमखसुतहा मित्रपुत्रैकमित्रः ❀ ।
यो वा श्रीदैस्समोदैरभिनुतचरितो वातजातस्वदूतो,
रामो मे मोक्षभूमोदयमुरुदयया सन्ततं सन्तनोतु ॥

महोदारं धीरं क्षितिदुहितृदारं रघुवरं,
लसच्चापं भूपं हृतबिबुधतापं बहुकृपम् ।
विशालाक्षं दक्षं हृतपिशितभक्षं मुनिनुतं,
गुणारामं रामं वदनजितसोमं हृदि भजे ॥

विभीषणराक्षसहर्षकरोऽपि, विभीषणराक्षसनाशकरश्च ।
किरीटसुकुण्डलमौक्तिकदामधरोऽवतु मां रघुनायक आशु ॥

❀ मित्रः सूर्यस्तस्य पुत्रः सुग्रीवः स एवैकं मित्रं यस्येति ।

सद्भक्तिचित्तविलसद्रमणीयमूर्तिः सुग्रीवमुख्यहरिपोषणजागरूकः*।
अत्यन्तदुष्टखरहा ❀निहताघनामा मां पालयेद्रघुपतिर्यदुनायकश्च ।

विविधगुणैस्समुपेतां प्रविधुतदोषां बुधोत्तमैर्वन्द्याम् ।
उत्तमनायकयुक्तां सत्तमगिरमिव सरस्वतीं वन्दे ॥

श्रीरामार्पितहृदयं ब्रह्मानन्दाब्धिमध्यकृतशयनम् ।
कामादिदानवघ्नं नारायणमिव गुरुं मम नमामि ॥

श्रीरङ्गाख्यहरिस्थलस्य निकटे ह्यग्रोऽभिविद्योतते,
नम्ना लालुगुडीति विश्रुततरस्त्वाम्नायपारंगतैः ।
तर्कव्याकरणादिशास्त्रनिपुणैरग्न्याहितैस्सद्गुणै—
र्दीप्तैर्विप्रवरैर्युतो हि बहुभिस्सारोऽग्रहारो महान् ॥

सप्तर्षीश्वरनामकोऽत्र सुगुणः श्रीराघवाराधक—
स्तातो यस्य वसुन्धरामरवरो माता च सीताह्वया ।
रामस्त्वाम्यभिधः कविः स महतो रुक्माङ्गदक्ष्मापते—
स्संयुक्तं सुगुणैरिमं वितनुते चम्पूप्रबन्धं शुभम् ॥

सत्साहित्युपमामुखातिरुचिरालङ्कारहीनाप्यसौ,
राज्ञो भागवतोत्तमस्य सुगुणैर्वृद्धा प्रसिद्धा भवेत् ।
मुक्ताहारमुखैः कलापनिवहैर्हीनाऽपि नानाविधैः,
पातिव्रत्यमुखैर्युता गुणगणैर्नारी न किं राजते ॥

❀सुग्रीवनामानोऽर्जुनहयास्तेषां पोषणे जागरूकः । * खरहा धेनुकासुरस्य हन्ता । ×निहतः अघासुरः कबन्धश्च येनासौ ।

अस्ति खलु इक्ष्वाकुसन्तानसत्कलानां महाबलानां परिपन्थिवेतण्डम ण्डलखण्डनहर्यक्षाणां लब्धसुगुणलक्षाणां समस्तविद्यासिन्धुसन्दोहसिन्धूनां सज्जनबन्धूनां प्रतापलज्जितविभाकराणां शुभाकराणां त्रैलोक्यजठरविसृत्वरकीर्तीनां पञ्चशरमूर्तीनां यथाविधिविहितसप्ततन्तूनां दण्डितसमन्तूनां स्वबलपराजिताद्राजकाद् गृहीतकराणां प्रजासुखकराणां शक्तित्रययुक्तानां मूर्धाभिषिक्तानां शातकुम्भकुम्भव्रातशोभितविशालचन्द्रशालोपेतैर्निकेतैरभ्रंलिह पृथग्विधक्रय्यवस्तुपरिपूरितहृद्यनिषद्याभिस्सरमणीयाभिर्विपणिभिरुपशोभितं सुपयोधराभिः हंससञ्चारयुक्ताभिः कान्ताराहणयुक्ताभिः रुचिरालिपरिवृताभिः पद्मिनीभिरुपशोभितं आगमसागरपारदृश्वभिः मातरिश्वमित्रत्रय* त्राणत त्परैः भूसुरैर्भृशं भासुरं शास्त्रकलासु कुशलेन राजन्यकेन विराजितं, स्वधर्मपरैरपरैर्वर्णैरपि परिपूर्णं उद्यानमिव तुङ्गसालालङ्कृतं,कौसल्यासदनमिव सदा रामशोभितं शब्दशास्त्रमिव विविधागमव्यवहृतं शिवभक्तमुख्यमिव नितान्तभूतिविभूषितं वसुन्धराभरणायमानं वैदिशाभिधानं किमपि पुटभेदनम् ।

गन्धर्वोत्तमपूर्णा विबुधसमेता वृषैर्धिता नगरी ।
रम्भाद्यलङ्कृता सा लसदमृता भाति वासवपुरीव ॥

❀ मातरिश्वमित्रयमग्नित्रयम् ।

×गंधर्वोत्तमपूर्णा गंधर्वश्रेष्ठपूर्णा अश्वश्रेष्ठपूर्णा च विबुधसमेता देवयुक्ता पंडितयुक्ता च वृषैर्धिता इन्द्रवर्धिता धर्मवर्धिता, ऋषभवर्धिता च, रम्भाद्यलङ्कृता रम्भानामदेवदास्यादिभिरलङ्कृता, कदल्यादिवृक्षैरलङ्कृता च, लसदमृता पीयूषविराजिता जलविराजिता च ।

वरपुष्पकसंयुक्ता बहुपुण्यजनाश्रिता ।
राजराजभुजागुप्ता पूर्विभात्यलकेव सा ।
कुण्डलिसहस्रपूर्णा रसातलगता च नागरत्नयुता ।
वरतक्षक❀परिलसिता नगरी सा भाति भोगवत्युपमा ॥
सौधाग्राणि नगर्यास्तस्या नूनं स्पृशन्ति सुरलोकं ।
यस्मात्तत्र चिरालम्बे स्थितोऽपि गगने न भूतले पतति ॥
शङ्केऽहं तन्नगरं लङ्केशात्मजजितं शचीजानिम् ।
त्यक्त्वा राजन्वन्तं देशं प्राप्ताममर्त्यराजपुरीम् ॥
सारत्नावलीयुक्त तदलंकारशास्त्रवत् ।
विभाति गीतियुक्तत्वाद् वृत्तशास्त्रोपमं +पुरम् ॥
दीपः प्रकाशसंयुक्तस्तस्माद् यामिन्यधीश्वरः ।
तस्माद्दिनमणिस्तस्मात्सारं तद्रत्नभूषितम् ॥
पुरी सैषाऽद्भुतं कस्य चरीकर्ति न विष्टपे ।
यस्माद्विभाति मधुराऽयोध्या भोगवत्यपि ॥
पुरीमेतावसत्तस्मिन् शरीरक्षीणचित्तजः ।
ऋतध्वजसुतो धीमान् रुक्माङ्गदमहीपतिः ॥
सन्मार्गमभिनिविविशे जन्मन आरभ्य खलु सुराजैषः ।
क्षितिनाथ उपाध्यायात् श्रुतिमुखविद्याः किलाध्यगीष्टासौ ॥

❀ वृत्तकर्मकारः तक्षकनामा सर्पराजश्च ।
+ साराद्यः अलङ्कारप्रभेदा गीत्यादयो वृत्तप्रभेदाः ।

सर्वास्वाशु कलासु नैपुणमयं प्रागादि भूताग्रणीः,
कीर्तिः काममदीपि निर्मलतराऽस्याशेषदेशेष्वपि ।
विष्णौ भक्तिरजन्यतीव नृपतेर्धर्माश्च शर्माव्हान्,
सोऽत्रोध्येनमशिश्रियच्छुभगुणौघो दुर्हृदोऽदुद्रुवन् ॥
हरिभक्त्याऽस्य नेत्राभ्यामानन्दाश्रूण्यसुस्रुवन् ।
नामामृतं हरेस्सोऽयमदधत् सन्ततं नृपः ॥
पुराणमुख्यन्त्वपठच्छुकोक्तं नराधिपो भागवतं महात्मा ।
दिनं दिनं प्रत्यभिनैः प्रसूनैरनन्तमादृत्य स हि मानति स्म ॥
पाञ्चालः पाण्ड्योऽपि च गान्धारो मागधोऽपि चाम्बष्ठ्यः ।
कौरव्यो नैषध्योऽप्यङ्गा वङ्गास्तथा कलिङ्गाश्च ॥
कम्बोजोऽपि च चोलः केरलयवनौ किराभ्यमित्रेण ।
अपरेऽपि जिता भूपा नृपशार्दूलेन तेन निश्शेषाः ॥
एष तेषां नृपो भूपतीनां मणीन सम्प्रगृह्याखिलान्नीतवान् स्वां पुरीम् ।
वैदिशाभिख्यपुर्याः क्षितेः केवलं, रत्नगर्भाह्वयस्सार्थ आसीत्तदा ॥
उदिते नृपवरतरणावसतां मुकुलितमभून्मन.पद्मम् ।
द्विजराजमण्डलमल कुवलयमेधांबभूव च विचित्रम्❀ ॥
रुक्माङ्गदविष्णुर्यद्युक्तः क्षमया श्रियाऽपि तत्र बत ।
द्विजराजदास आसीदरिचक्रं यच्चकर्त तच्चित्रम् ॥

❀ विरोधाभासः

रुक्माङ्गदेन महता द्विजरत्नैः परिवृतेन रुचिरेण ।
गोमण्डलं समस्तं सुतरां रञ्जितमभूत्सुवृत्तेन ।
विकस्वरयशा एष न जितोऽभूत् परैर्नृपः ।
महीयांसोऽपि दुर्धर्षा महीधरवरा इव ॥
तस्य प्रतापसाम्यं भूम्यधिपस्य प्रभाकरो लब्धुम् ।
क्षोणिप्रदक्षिणाख्यं नियमं कलयति सदा नूनम् ॥
कीर्तिमतीत्ववलक्षां मूर्तिमतीं तस्य विष्टपत्रितये ।
अनिशमपि सञ्चरन्तीमनिमिषमुनिरिति वदन्त्यज्ञाः ॥
रत्नं रत्नस्य सदृशं जाह्नवी जाह्नवीसमा ।
रुक्माङ्गदमहाराजो रुक्माङ्गदनृपोपमः❋॥
कीर्तिरन्या मतिश्चान्या मूर्तिरन्यैव भूपतेः ।
धैर्यमन्यत् घृणा चान्या शौर्यमन्यन्महामतेः ॥
प्रभावनिलयस्सोऽयं सभायां मन्त्रिभिर्वृतः ।
व्यभाद्दिवि वृतस्तारैर्विभावर्यधिपो यथा ॥
रुक्माङ्गदे धात्र्यधिनाथसिंहे धर्मेण संरक्षति सिन्धुकाञ्चीम् ।
विव्याध योऽप्याऽजननान्तकालं, सुव्याधयः प्राणिगणा बभूवन् ।
भूपानां प्रवरे तस्मिन् गोपायति वसुन्धराम् ।
सुकुमाराः स्वयं चाऽऽसन् सुन्दर्यस्तु स्वदेहवत् ॥

× अनिमिषमुनिर्नारदः ❋ अनन्वयालङ्कारः

राज्यं प्रशासत्यवनीश्वरेऽस्मिन् वभावनावृष्टिमृते धरित्री ।
सर्वे जना अध्ययनमन्तरेण, विनाऽवकेशित्वमनोकहाश्च ।
चित्रं रुक्माङ्गदस्तत्रासील्लसत्फलरसोपभुक् ।
लेभिरे सुखमत्यन्तं समस्ता अपि साधवः ।
सन्ध्यामिव सद्वन्द्यां सन्ध्यावल्याह्वयां स उपयेमे ।
कल्याणगोत्रधारी रुचिरोमामिव वृषाकपिस्साब्जः ॥
गोत्रापतिस्तु विप्रेभ्यो गोत्रास्स ददृदे तदा ।
अस्तिक्षीरा+स्सवत्सा हि हस्तिवाजिधनानि च ॥
स तया पाणिगृहीतया साकं रंरमतेस्म भूपालः ।
आदित्यकुलसुखकरो राजोत्तंसो यथाऽचलात्मजया ॥

सा तावत्पूना अरुन्धतीव वसिष्ठं, अनसूयेवाऽत्रिं, लोपामुद्रेव कुम्भसम्भवं, रेणुकेव जमदग्निं, दमयन्तीव नलं, चन्द्रमतीव हरिश्चन्द्रं, रोहिणीव चन्द्रं, पुलोमजेव सुरेन्द्रं, नरेन्द्रवर्यन्तं पर्यचारीत् ।

रूपशीलसहितां कुटुम्बिनीं भूपकुञ्जर इमामुपेत्य सः ।
प्राप हर्षमतुलं स्वमानसे सोपलभ्य च पतिन्तमुत्तमम् ॥

ततः कतिपयेषु गतेषु दिवसेषु रत्नगर्भापतिपत्नी खल्वन्तर्वत्नी बभूव सा ।

भुक्तं तया वनितया भक्तं गर्भान्वितोदरे स्थातुम् ।
अवकाशाभावादिव सुविनिर्गतमास्यदेशतस्तस्याः ॥

+ अस्तिक्षीरा इत्येकं पदं गाव इत्यर्थः

वान्तं भवति मयान्नं प्राणत्राणाय भक्षयामि मृदम् ।
इत्यालोच्यैवासावन्तर्वत्नी मृदं मुहुर्बुभुजे ॥

हन्त ! सुरतादिसुखदानबहुदक्षं यौवनमिदं प्रसवतो मम विनश्येत्
इत्यतिशुचेव नृपसत्तमपुरन्ध्री, कार्श्यमयतिस्म भृशमिन्दुवदना सा

मन्दाक्रान्ता कृशतनुयुता गर्भमेषा तु धत्ते,
संप्रत्यस्या वयमपि तनोर्नैव कुर्याम भारम् ।
इत्यत्यन्तं किल करुणया तत्कथाभ्यासुभाभ्यां,
क्षोणीदेशे वलयनिचया ऊर्मिका अप्यपतन् ॥

प्रापतुर्धृतगर्भाया भूपवर्यस्य योषितः ।
चूचुकं मुखमप्यस्य मेचकत्वं वलक्षताम् ।

जयार्थमिन्दोर्गर्भिण्याः प्रयातुमिव यत्नकृत्
अवलोक्योर्ध्वमस्यास्सद्भवले निःश्वसन्मुखम् ॥

अन्तःस्थस्य स्वस्य गर्भस्य शत्रून्, रक्षोमुख्यान् वाञ्छयेव प्रहर्तुम् ।
धृत्वा दीर्घं व्यक्तरोमालिखड्गं, मन्दं मन्दं निर्ययौ कुक्षिरस्याः ॥

अथ वैजनने समुपागतवत्यवनीशसती हिमरश्मिमुखम् ।
कमलाक्षदृशं तनयं सुषम सुषुवे ह्यदितिस्सुरराजमिव ॥

चित्रचित्रमिदं चित्रं हंसवंशसमुद्भवः ।
यद्भूदारो महिष्यां स नरव्याघ्रमजीजनत् ॥



द्वितीयो विलासः

द्वीपान्सप्त विजेतुं चापः कर्केति योधवृन्दं स्वम् ।
पृच्छन्निवाऽरुददयं स्वच्छप्रज्ञशिशुस्तदारिष्टे ॥ ५३ ॥

दक्षिणेभ्यो द्विजेभ्योऽदात् स क्षित्यधिपतिस्तदा ।
समांसमीनाः पीनोध्नीः प्रमोदाद् गोमतल्लिकाः ॥

स तावत्सुमतिर्वसुमतीपतिः स्थूललक्षाग्रगण्यो धरण्यमर्त्येभ्यो धान्य-सुवर्णनिष्प्रवाणिमणिहिरण्मयकलापकलापान्वितीर्य भूयोमोदस्सुकुमारस्य निजकुमारस्य विधिवद्विधाय जातकर्म धर्माङ्गद इति तस्य नामधेयं विदधे । स तु नागायुतबलोऽयमागामिनि समरे प्रत्यर्थिसार्थं पार्थिवबालः पादाभ्यां वाढं ताडयितुं प्रागेवाभ्यस्यन्निव मुहुर्मुहुर्मृदुलं पदयुगलमुदनैषीत् ।

पादैश्चतुर्भिस्सह धर्ममेवं सञ्चारयिष्यामि महीतलेऽहम् ।
इत्येष बालोऽभिनयन्पृथिव्यां जानुद्वयेनाऽप्यचरत्कराभ्याम् ५५

लालित एव भृशं स्वपितृभ्यां केलिमलं विविधां विदधत्सन् ।
रम्यगुणोऽवृधदेष तु बालस्तम्यधि रिव+ पाण्डुरपक्षे ॥ ५६ ॥

अथ कदाचिन्निर्जितराजद्वेषादिविश्वामित्रो विश्वामित्रः, तेजोविद्रावित-पराशरः पराशरः, साधुभ्यस्सम्यगुपदिष्टबोधायनो बोधायनः, तेजोनिर्जित-

+ चन्द्र इव

तीक्ष्णमरीचिर्मरीचिः, विधिवद्विहितपौण्डरीकवाजपेयादिमहाक्रतुः, सुतरामाराधितवामदेवो वामदेवः, यथाशास्त्रमाराधितवीतिहोत्रो वीतिहोत्रः, यथाविधिसमर्चितातिथिर्मेधातिथिः, प्रतिकालमुत्पादिताग्निहोत्रवैश्वदेवधूम्यो धौम्यः, न्यायशास्त्रे निष्णाततमः गौतमः, सततमनुभूयमानब्रह्मानन्दश्शतानन्दः, विरचितज्योतिश्शास्त्रसर्गो गर्गः, निजनियमात्तगन्धमार्तण्डिमार्कण्डेयः, चुलुकस्थापिताम्भोनिधिः कुम्भोद्भवः, पृथिवीश्रोत्रभः कानीनो नाम महामुनिः, महायागकोटियाजकौ याजोपयाजकौ अपरे वत्सकुत्सप्रभृतयो रमारमणचरणाम्बुरुहलोलम्बायमानमानसाः समस्तलोकप्रतीक्ष्याः परस्सहस्राः ब्रह्मवर्चसनिलयाः, दुष्कृतसन्तमसतामरसबन्धवः तापसपुङ्गवाः, पङ्कप्रस्तरभङ्गटङ्कवारियाणि चतुर्वर्गोदर्काणि जन्मकर्मगुणाश्रितानि अच्युतस्य नामान्युच्चैः कीर्तयन्तः लोकनमात्रेण लोकानधन्यान्धन्यान् कुर्वन्तः मधुमथनकीर्तनेतरवचनरचितमौनकं शौनकं पुरस्कृत्य क्षित्यधिपन्तं दिदृक्षवस्तस्योपकार्याप्रतीहामाजगाहिरे।

गर्गा अत्रय एतान् भृगवः कुत्सास्तथा वसिष्ठाश्च।
धन्या अगस्तपश्चाप्यन्ये मुनिकुलभवा अनुययुस्तान ॥ ५७ ॥

तेषामागमं वेगयुक्ताद्दौवारिकादाकर्ण्य पुण्यशीलस्स धरण्यधिपः स्वकीयभवनाद्बहिः विद्यमानान्विद्यानिलयानविद्याकादम्बिनीवातूलान् ससंभ्रमं तानुपगम्य सौम्यगुणः हृष्टात्मा साष्टाङ्गं प्रणनाम् ॥

इदं विचित्रं यद् भूपस्सुकृतं लब्धुमिच्छया

तेषां तपस्विनां सम्यक् पादपीडनमातनोत ॥ ५८ ॥

नागशायिचरणार्पितचित्तान् रागमुख्यरिपुकुञ्जरसिंहान्।
वेगतः स्वभवनं स तु नीत्वा स्वागतादिभिरपूजयदेनान् ॥५९॥

अथ पार्थिवोऽसौ विष्टरश्रवःप्रियेभ्यस्तेभ्यो विष्टरासनानि मंक्षु +प्रादित

दयान्चक्रे नृपे तस्मिन्नयांचक्रे भृशं मुदम्।
आसाञ्चक्रे मुनिस्तोमो दासाग्र्यं सर्वतो हरेः ॥ ६० ॥

फलपर्णाशनासक्तैर्विविधागमन्दिरैः।
आवृता विरराजासौ भूभृद्वर्यो द्विजैर्भृशम् ॥ ६१ ॥

बद्धाञ्जलिधरित्रीशश्शुद्धान्तःकरणान्मुनीन्।
मेघगम्भीरया वाचा सोऽयहन्तृन्नवोचत ॥ ६२ ॥

अद्यैव जन्म सफलं सकलं ममाऽभूदद्यैव मेऽपि पितरो नितरामतृप्यन्।
अद्यैव मे फलयुता निखिला वृषाश्च यद्यूयमच्युतसमा गृहमागता मे ॥

मम तावद्विवक्षा काचिद् वर्तते तच्छ्रूयतामुच्छ्रितप्रभावैः करुणाबरुणालयैस्तरुणारुणसंकाशैः युस्माभिः। व्रतेषु समस्तेषु यदुत्तमं यदाचरणेन निखिलान्यार्द्राणि शुष्काण्यपि दुष्कृतान्यवश्यं नश्यन्ति, पुरुषार्थाश्चत्वारश्च संभवन्ति, तत्संप्रत्यन्तर्वाणयो भवन्तस्सम्यगवधार्य घोरसंसारपारावारपरिमग्नाय मह्यं मह्यमर्त्यमुख्यास्समाख्यान्त्वित्यभिधाय निवचनेकृत्य तस्थौ।

+मंक्षु शीघ्रं

इतिविनयसमेतं पृच्छतस्स्वच्छबुद्धे र्मधुमधुरिमधुर्यं वाक्यमाकर्ण्य तस्य। क्षितिपतिवर ! धर्मं साध्वपृच्छस्त्वमस्मानिति मुनिवरसंघाः श्लाघयांचक्रुरेनम्॥

मुदातदानीमुदारमतिमिडापतिमंडाञ्चक्रे मुनिचक्रं तम्।
उपास्ति वैष्णवीं पुण्यां नृपाग्नेयीं करोषि च।
नास्तिको दण्ड्यमानोऽपि नास्ति को रक्ष्यते त्वया॥
प्राप्तमनोज्ञगुणस्त्वं साप्तपदीनं तनोषि भागवतैः।
पाथेयमातिथेयः स्वर्गस्यान्नं ददासि विप्रेभ्यः।
मतिमान् जीव इव त्वं द्युतिमानपि भोस्तुषारगुरिव त्वम्।
धृतिमान् मेरुरिव त्वं क्षितिपतिकुञ्जर ! मुकुन्ददासाग्र्य॥
मदन इव रूपवांस्त्वं विद्यावानपि पतञ्जलिरिव त्वम्।
लक्ष्मीवानिन्द्र इव त्वं हि यशस्वांश्च रामचन्द्र इव॥

ततस्तेषामग्रजन्मनामग्रेसरः भागवतावतंसः राकामिहिकाकिरण इव सकलकलासंपूर्णः कमलबन्धुरिव तमोनिहन्ता, षण्मुख इव शिखिसंरक्षणतत्परः, भारतीपतिरिव सत्यलोकप्रियः, पुण्डरीकाक्ष इव स्वकर्मविहितमङ्गलदेवतासन्तोषः शौनकः, सहपुत्राय सहामात्याय सगवे जगतीपतिश्रेष्ठाय श्वःश्रेयसं+ते भूपादित्याशीर्वचनं रचयित्वा क्षित्यधीश्वरं तं प्रत्यवोचत।

अधुना तद् वयं ब्रूमो मधुनाशनसेवक !।
विहारयुक्तैरध्यात्मं महाब्रह्मै रनुष्ठितम्॥

+श्वःश्रेयसं कल्याणम्

जह्नुकन्यकेव निम्नगासु, श्रुतिरिव विद्यासु, धरणीगीर्वाण इव वर्णेषु, कृतमिव युगेषु, अन्नदानमिव दानेषु, कुञ्जराशन+इवानोकहेषु, वसिष्ठकुटुम्बिनीव पतिव्रतासु, वेदजननीव मनुषु विलोलनमिव करणेषु, सुरभिरिव पशुषु, ब्रह्मानन्द इवाऽऽनन्देषु, प्रह्लाद इव भागवतेषु, नारायण इव गीर्वाणेषु, दिवाकर इव ग्रहेषु, क्षीरसागर इव सागरेषु, रत्नसानुरिव शिलोच्चयेषु, द्वितीयाऽऽश्रम इवाऽऽश्रमेषु, कौस्तुभ इव रत्नेषु,एकादशीव्रतमेव व्रतेषु समस्तेष्वपि परमिति विशांपते ! नीतिविदांवर ! विदांकरोतु भवान्।

एकादश्युपवासज्वलनो जागरणमारुतोपेतः।
तरसा भस्मीकुरुते पातकवन्यामवन्यधिपसिंह॥

ये जना जनार्दनव्रतव्रतति उपवाससलिलसेचनैः जागरणावरणैरपि गोपायन्ति, तेभ्यस्सा चतुर्विधपुरुषार्थफलानि समर्पयति।

वक्ष्याम्यथ तु तद्विधिं श्रृणु सुधीरश्नन् दशम्यां सकृत्,
पद्माजानिदिने भवानुपवसन् कुर्वन्सपर्यां हरेः।
नक्तं तद्गुणकीर्तनैश्शुभकरैर्निद्रा सुविद्रावयन्,
द्वादश्यां सकृदेव भोजनकरो धूनोतु निद्रां दिवा॥

तस्मिन्दिनत्रयेऽपि सन्त्यक्तसीमन्तिनीपरिरम्भस्सन्नम्भोरुहनाभनामानि क्षेमावहानि त्वं गर्ज वर्जयित्वा लज्जामुच्चैस्तराम्।

+कुञ्जराशनः पिप्पलवृक्षः।

हरिकीर्तनकर्तारो वैकुण्ठं यान्ति शाश्वतम् ।
श्रुति 'ध्रु वासो अस्ये' ति क्षितिपाल हि गर्जति ॥
आशया गुरुकलत्ररतो वा गोशतक्षितिसुर'युतहा वा ।
केशवेति मनुजस्सकृदुक्त्वा नाशयत्यखिलकिल्बिषसंघम्
अज्ञानतोऽपि कथितं हरिनाम मर्त्यैः, क्षिप्रं निहन्ति दुरितानि परश्शतानि ।
बालैरपि प्रणिहितो ज्वलनः किमाशु, सर्वं पलालनिवहं न दहत्यरिघ्न ॥

विप्रः कश्चिदजामिलाह्वययुतो जायां विहायानघां
शूद्रीगाम्युदपादयद्दशसुतांस्तस्यामघस्यालयः ।
दृष्टवान्त्ये समये भयात्पितृपतेश्चारान्स नारायणे-
त्याक्रुश्यास्फुटवर्णमन्तिमसुतं पद्माद्मासद्माऽगमत् ॥
कोऽप्यन्धः परदारगाम्यपि पिबन्मद्यानि विद्याधरा-
ख्यो विप्रः परलोकगे स्मरवधूकल्पे स्वतल्पे शुचा ।
स्मारं स्मारमलं सतीं सुयुवतीमुन्मादवन्मानसो,
रामा मे क्व गतेत्युदीर्य सततं भूपाग्निमापाऽमृतम् ॥

तस्मात्सत्वरमेव रमेशदिवसव्रतं समाचमरेति मुनीश्वरोऽयमवनीश्वरं तं समुदीरयामास । मुदितचित्तेन तेन राज्ञा प्राज्ञास्ते सुपूजितास्तपोधनास्सर्वेऽपि गर्वेण रहितं यथागतं जग्मुः रुक्माङ्गदस्तावद्विधिवदेकादशीव्रतमनुतिष्ठन् सुपर्ववर्यस्य हरेस्सपर्यावमाने तमित्थं राजर्षिर्मनीषी सविस्तरमस्तावीत् ।

यन्दातारमवेद्य वासवगवीमन्दारचिन्तामणी
मन्दाद्यं पृथु यान्ति यच्छुभकथास्सन्दारितांहोगणाः ।
स्कन्दाब्जासनवासवप्रभृतिभिर्वृन्दारकैर्वन्दितं ।
तन्द्रासावनजागरूकमनिशं वन्दामहे शार्ङ्गिणम् ॥
माया यस्य तनोति मोहितमिदं जायात्मजादौ जगद्-
गेया यस्य सुकीर्तिरब्जजमुखैस्तोयास्पदं यत्पदम् ।
दायादस्स च येन दानवपतेः कायाधवः ❀ पालितः
प्रेमानम्बुधिमेखला + धिपसुतयोः पायात्स नः केशवः ।
वेदानृग्यजुरादिकांश्छुभकरान्यो दानवेन्द्राहृता-
नादाय स्वसुताय पद्मजनये प्रादात्पुरा पद्मदृक् ।
पादाम्भोरुहवन्दनं रचयतां खेदापहारी सतां ।
मोदान्नस्स तनोतु संसृतिभयच्छेदातिदक्षाभिधः ॥
स्वर्वासीश्वरपालनार्थमवनौ खर्वाकृतिं यो भजन्,
सर्गमर्त्यजयोद्धतस्य तु बलेर्गर्वापनोदं व्यधात् ।
दुर्वासा अपि यत्सुदर्शनभयाच्छर्वादिलोकान्ययौ ।
निर्वाणार्थमजस्रमस्य रसने कुर्वादरात्कीर्तनम् ॥

एवमेव सोऽवनीपतिः प्रतिहरिदिनं उपोषणजागरणादिकमखिलमपि

❀कायाधवः प्रह्लादः +अम्बुधिमेखला भूमिः

सश्रद्धं विशुद्धबुद्धिर्व्यधत्त । स कदाचिन्महामतिर्महीपतिः भटाननेकान् स्वनिकटमानीय तानेवमादिदेश हे योधाः ? दशम्या दशम्यां हास्तिकमानकानधिरोप्य चतुस्समुद्रसीम्नि मद्राष्ट्रे जनपदेजनपदे, पुटभेदने पुटभेदने, चतुष्पथे चतुष्पथे, संवसथे संवसथे, सम्यगास्माकीनं निदेशमिमं जनानखिलान्वेदयत "हे जना अमुष्मिन्नहन्येकवारमभ्यवहरत, श्वो भाविनि वासुदेववासरे सम्यगुपवासं कुर्वन्तश्शर्वर्यां केशवकीर्तनैस्संवेशं सन्त्यजत । द्वादश्यां सकृदेव जग्धिमाचरन्तो दिवास्वापमपाकुरुत । वासरेष्वमीषु त्रिष्वपि अङ्गमभ्यङ्गमपि मा कलयत् । वासरेष्वमीषु अष्टवर्षाधिकानामपूर्णाशीतिवयसां मध्ये य एतं राजकीयं निदेश प्रत्यादिशन्ति ते त्ववश्यं कश्याश्शीर्षच्छेद्याश्च भवेयुरिति व्याहृत्य पटहानपि दृढं घोषयत । भटास्तेऽपि सार्वभौमस्य तस्य नियोगमुत्तमाङ्गे कृत्वा तथैव वितेनुः ।

रुक्माङ्गदनृपभीत्या सर्वेऽपि जनास्सरोजनाभदिने ।
त्यक्तान्ना अपि नितरामर्जुनभक्तं सिषेविरे सुखदम् ॥

तत्र विषये मानुषा अशेषा अपि स्वेषां भाविन्यनिमिषजनुषि सन्ततकर्तव्यं निद्रात्यागं प्रागभ्यस्यन्त इव नागशायिदिने जागराञ्चक्रुः ।

एकादश्यां जनास्सर्वे रुक्माङ्गदनिदेशतः ।
हरिमुच्चैः स्तुवन्तोऽपि हरे❀ दुःख वितेनिरे ॥

+हरेः इन्द्रस्य

विष्णो हरे जयजयेति नृपेन्द्रभीत्या गर्जत्यलं हरिदिने निखिले जनेऽपि ।
तत्पाणिताडनरवप्रतिशब्दडम्भान्नूनं स कैटभजितं विषयो ❀" ऽप्यगायत् ॥

देशे तस्मिन्भूपतेर्भीतभीता, भूदेवाद्या वासराणां त्रयेऽपि ।
रामासक्तिं त्यक्तवन्तोऽपि सर्वे रामासक्तिं सर्वदा कुर्वते स्म ॥

तत्र घस्रत्रये नार्यो भर्तृसङ्गविवर्जिताः ।
भुजङ्गोत्तमपर्यङ्कं भजन्तिस्माऽनघा अपि ॥

क्षीणपुण्या जना देवलोकादधस्संपतन्तश्शुचा कैटभारेर्दिने ।
कीर्तितं तैर्हरेस्सन्निशम्याऽऽह्वयं लब्धपुण्याः पुनर्नाकमेवाऽगमन् ॥

विष्णुर्भाक्तिमर्हाघघ्नी ·जिष्णुतुल्यस्य धीमतः ।
समवर्धत भूपस्य सममाहस्करैश्शुचा ॥

ये जना रुक्माङ्गदवसुधेशदेशे पञ्चतामञ्चन्ति स्म, ते नारायणसारूप्यमवाप्य नवरत्नपरिष्कृतानि कार्तस्वरमयानि मार्तण्डसमानानि विमानानि समारुह्य रुक्माङ्गदगदाग्रजराजधान्योस्सौन्दर्यतारतम्यं सम्यक्परीक्षितुमिव सनातनं श्रीमद्वैकुण्ठलोकमटीकन्त । तदनन्तरं मन्दारपारिजातादिपादपजाताऽभिशोभितेन विगतशोकैश्शोकैरपरैरनेकैरपि पत्ररथैस्सुकूजितेन नैश्रेयसाभिधानेन कमनीयेन महतोद्यानेन परिष्कृतं पुष्करनाभसरूपैस्सन्ततमनन्तचिन्तनकीर्तननर्तनासक्तैर्महापुरुषैर्निषेव्यमाणं, सत्यलोकमिव वेधसा-

❀विषयः शब्दादिकः

संरक्षितं, कैलासमिव विनायकाऽधिष्ठितं, शेषरत्नशोभितमप्यशेषरत्नशोभितं पद्ममण्डितमपि पद्मामण्डितं, पुण्यजनसुलभमपि पुण्यजनदुर्लभं, वैष्णवं लोकं लोकास्ते लोकं लोकं नातृप्यन् ।

वैकुंठं प्राप्तवन्तोऽपि ते जनाः पुण्यशालिनः ।
वैकुण्ठप्राप्तये सर्वे स्पृहयन्ति स्म वैष्णवाः ॥

सतस्ते हृषीकेशपार्षदकलापैस्सोपचारं श्रीपतेस्समीपं प्रापिताः ।

दासेष्टदमथ धन्या आसेचनकं दृशां घनश्यामम् ।
पीताम्बरं वसानं शीतांशुश्वेतशंखचक्रधरम् ॥
नन्दकशार्ङ्गसमेतं सुन्दरगदया युतं रमोरस्कम् ।
आलोक्यामी अधिकं ते लोकाः संप्रणेमुरब्जाक्षम् ॥

तदानीं मूर्ध्नि बद्धाञ्जलयो मञ्जुलवाणीपुञ्जैः कञ्जविलोचनं गुणानामालयमित्थं पणायांबभूबुः । श्रीमते समस्तकल्याणगुणगणमणितरङ्गिणीरमणाय, कमलारमणाय, वन्दारुनिकुरुम्बतमस्सहस्रकिरणाय, श्रुतिततिपणायितचरणाय, कौस्तुभाभरणायनिखिलभुवननिदानाय, तपस्विजनतावर्णितापदानाय, विश्वोत्पत्तिस्थितिसंहारार्थमुपात्तपरमेष्ठिवैकुण्ठनीलकण्ठाख्यमूर्तये, पवित्रतरकीर्तये, रागादिविरहितयोगाधिपतिमानसहंसाय, कलितबलिमदध्वंसाय, विधिविहितप्रशंसाय, मधुकैटभाह्वयदितितनयस्तनयित्नुध्वंसवात्याधुरन्धराय, वनमालालङ्कृतकन्धराय, हिरण्यकशिपुहिरण्याक्षचक्षुश्रवःपक्षिनायकाय, कायाधवप्रमोददायकाय, नन्दकाह्वयसायकाय, शतमखमुखनिखिलमखभुक्स-

न्दोहसन्तोषपयोनिधिसुधामयूखाय, प्रातःपङ्कजसदृक्षमुखाय, नित्यसुखाय, महारजतस्तेयादिमहावृजिनविपिनवैश्वानरायमाणसहस्रनाम्ने, अवाङ्मनसगोचरभूम्ने, वैकुण्ठधाम्ने, निजाननभुजासक्थिपादादुत्पादितमेदनीदेवराजन्यवैश्यशूद्राय, घृणासमुद्राय, नागराजभोगशयनाय, पुष्पवन्नयनाय, तुभ्यं भगवते शतकृत्वस्सहस्रकृत्वश्च नमो नमः ।

-❀:❀-

तृतीयो विलासः

पनायितवतामेवं जनानां वासकारणात् ।
इन्दिरापतिलोकोऽसौ मन्दिराणि बहून्यगात् ॥
यथा यथा पङ्कजनाभलोको जनैस्सुपुण्यैः परिपूरितोऽभूत् ।
तथा तथा संयमिनी यमस्य प्रक्षीणपापिष्ठजना बभूव ॥

तदानीं संयमिनीनगर्यान्तु तमिस्रान्ध तामिस्र, रौरव, महारौरव, कालसूत्र, कुन्भीपाक, तप्ततैल, तप्तसलिल, तप्तसीस, तप्तवालुक, तप्तायः पिण्डभक्षण, पुरीषभक्षण, श्वमांसभक्षण श्वमांसभक्षणाङ्गारभक्षणाङ्गारशयन, प्रस्रावपान,वीर्यपान, शोणितपान, वसापान,कराल, विकराल, सर्पवृश्चिकपीडन, परिघार्दन, त्रिशिखविदारण, बिशिखविदारण, क्रकचविदारण, निरुच्छ्वास, क्षारतोयसेचन, अधोमुखनिपातन, मुष्काग्रपाषाणपातन, मेढ्रसूचीपीडन,

तप्तायःस्थूणालिङ्गनप्रभृतयोऽष्टाविंशतिकोटिनरकाश्च पापिष्ठजनविहीनाः खल्वभवन् ।

यथा तरङ्गिण्युदकेन हीना यथा च वाग्व्याकरणेनहीना ।
यथा पुरन्ध्रीतनयेन हीना तथा न सा पूरजना विरेजे ॥

तदात्वे पापिष्ठजनागमनाभवात् चिररात्राय समवर्तिदत्तेन समस्तजनतापातकलेखनाधिकारेण वियुक्ताय चित्रगुप्ताय चित्तजवसुन्धरापतिस्सुन्दरीवक्षोजकुम्भयुगले मृगमदादिना चित्रलेखनाधिकारं कारुण्यादिव वितीर्णयन् आम्नायकायतनयप्रहिता अशेषान्येऽपीडयन्वृजिनकृन्निचयानजस्रम्

रुक्माङ्गदोऽन्तकभटानखिलानकार्षीत्स्व-
स्वाङ्गनास्तनसुपीडनकारिणस्तान् ॥

रात्रिन्दिवं दुष्कृतकरनिकरप्रहारव्यग्राण्युग्राणि दण्डधरयोधानां नाना विधान्यायुधान्यपि स्वाधिकारविनाशादमन्दं मन्दाक्षं प्राप्तानीव निलीयन्तेस्मचिरेण परेतराजवाही वाहद्वे षिवर+ श्च जरां प्राप्त इव मध्येगोष्ठं बद्धो बभूव ।

आलोक्य निरयाञ्छून्यान्कालो दुःखमढौकत ।
परहिंसावितन्वानाः प्राप्नुवन्ति न के शुचम् ॥

रुग्णा जना ये तु त एव दभ्रतां भवन्ति, रुक्माङ्गददेशमन्दिरः जनोऽभजद्धन्त ! बताच्युतत्वयं वोभूयते स्मार्कसुतः क्षशाङ्कः

+वाहद्वे षिवरः महिषश्रेष्ठः

स तदा किल मार्ताण्डिर्मृतपुत्र इवाऽधिकम् ।
जलमुञ्झन् स्वनेत्राभ्यां विललापाऽऽकुलेन्द्रियः ॥

स्वर्णस्तेयी सुरापो धरणिविबुधहा देशिकक्षेत्रगामी,
सत्संयोगी पितृघ्नः परधनसदनक्षेत्रदाराऽपहर्ता ।
इत्याद्याः पापभाजो नरकशतगता दृष्टपूर्वा मया ये,
तेष्वेकोऽप्यत्र लोको न भवति बत मे गोचरो लोचनस्य ॥

क्षुन्मां हा बत बाधते हि मदसूंस्तृष्णा च मुष्णात्वहो,
त्वन्तं पातकिनं प्रताडय च तां योषां सदोषामिति ।
मत्पुर्यां पटलं गिरां कृतमहाघातां भटानां च मे,
प्रागश्रौषमहन्तु यत्तदधुना नष्टं हि कष्टं बत ॥

इत्थं रुदन्यमत्वं स प्राप्तोऽप्यैच्छच्च पञ्चताम् ।
उत्तरोत्तरवृद्धिं के न वाञ्छन्त्यात्मनो जनाः ॥

एतस्मिन्नन्तरे शुद्धस्फटिकवलक्षकमनीयकलेवरः, भागवताग्रेसरः निगमप्रमुखनि———खिलविद्याप्रवीणः, करधृतमहतीवीणः, शमदमसुखसकलशुभगुणशुकपञ्जरः, सुरमुनिकुञ्जरःरागद्वेषादिरिपुसमूहहिमानीसूरः, विहितत्रिलोकीसञ्चारः, गौतम इव शतानन्दनन्दनः, ज्यौतिषिक इव सकल योगवेत्ता,अगदङ्कार इव दोषभयङ्करः, आत्मभूपरितोषकरोऽप्यात्मभूपरिभवकरः,कायाधवाय समर्पितमायापनोदाभिज्ञानः

प्राचेतसाय समुपदिष्टसकलाभीष्टवितरणनिपुणपंक्तिरथपुत्रपवित्रचरित्रः, कर्णपथशर्मावहसुवर्णवाहपुण्यलीलाजालवर्णनविशारदः, भगवान्नारदः सन्त्यक्तोपथम+वाञ्छोऽप्युपयम⁂माससाद । तदानीं काश्यप इवारुणकुमारः,वसुदेवनन्दन इव कालिन्द्यां निहितप्रीतिः, ऋत्विगिव दक्षिणाशारक्षकः, माणिक्यवाचक+इव मलिनजनशिक्षकः, विज्ञातसमस्तधर्माधर्मसमाजः धर्मराजः निजसमीपमागतं भागवतवरमालोक्य सत्वरं सत्वगुणनिलयन्तमत्यन्तं विनीतस्सन्नभ्याजगाम ।

नत्वा तं भास्करिस्तस्य कृत्वा पूजां यथाविधि ।
दत्वा च विष्टरं तस्मै मुक्त्वा कण्ठं किलारुदत् ॥

अनिमिषमुनिवृषभस्तावत् तत्तादृक्षशोकभाजं परेतराजमित्थमप्राक्षीत् । भोः कृतान्त ! नितान्तमिदानीं किन्निमित्तं शोचसि ? अयमक्षरचुञ्चुसत्तमश्चित्रगुप्तः निमित्तेन केन लेखनकर्मविहीनश्चित्रप्रतिमायते ? दुर्गतिषु निखिलास्वपि अनुभूयमानयातनाः पातककारिणः कस्मै निमित्ताय न दृश्यन्ते ? भीषणायां वैतरण्यांतरङ्गिण्यां एकोऽपि पापो कस्मात्कारणान्न पीड्यते ? त्वदायोऽसौकस्य दण्डोऽपि हेतोः प्रशान्तवैश्वानरायते ? एतद्धेतुं सम्यक्कथय ।

+उपथमः विवाहः, ⁂उपयमं यमसमीपम्

+ मणिक्यवाचकः शैवमता चार्येष्वन्यतमः

नारदेनेति संपृष्टो नीरजोद्भवसूनुना ।
कारणं निजदुःखस्य सूरसूनुरभाषत ॥

भो वैधात्र ! वैदिशाभिधानायां राजधान्यां राजन्यवरेण्यः कश्चिदच्युतचरणनलिनसमर्चननिरतः रुक्माङ्गदो नाम धीमानाहितलक्षणः श्रीवत्सलक्षणवासरव्रतं स्वयं विधिवदाचरन् निजविषयवर्तिनो मर्त्यानपि तद्व्रतं कारयति । सुकृतेन तेन मानुषा निश्शेषाश्च शेषतल्पसरूपतां समासाद्य जातरूपमयानि, मणिखचितानि रमणीयानि व्योमयानानि समारुह्य अहमहमिकया वैकुण्ठमेव सेवन्ते । एकोऽपि लोकोमदीयं स्थानाय नाऽऽयाति । तत एव दुर्गतयस्सर्वा अप्यपारा बभूवुः । असावपि लिपिकारमुख्यो लेख्यकर्मविहीनोऽभूत् । अनेन लिखितपूर्वाणि पत्रजालानि च मार्जितानि ।

ऐ दक्षाकस्तु ममाऽधिकारमखिलं भूलोकानाशयत्,
पाशोऽयं मम पापिबन्धनपरो गोबन्धनार्होऽभवत् ।
दण्डो मेऽप्यपकृच्छिरोविदलनो गोताडनार्होऽभवत्-
नित्यं पातकिघातकोऽहमधुना गोपालनार्होऽभवम् ॥

एनमुदन्तमभिधातुं विधातुस्सविधमधुनाहं यास्यामि । चतुरास्यात्मज मया सार्धं तत्रभवान् भवानपि कृपया समुपयात्वित्यभिधाय यमो वाचंयमो बभूव ।

इत्युक्तं तु परेतानां पत्युर्वाक्यं विधेस्सुतः ।

परदुःखाऽसहिष्णुस्स उररीकुरुतेस्म तत् ॥

मित्रसूनुरथ निर्गतः पुराच्चित्रगुप्तविबुधर्षिसंयुतः ।
रौप्यशैलमिव शंभुपालितं सत्यलोकमगमच्छिवङ्करम् ॥

तत्र खलु श्रुत्यन्तार्थविचारिभिरत्यन्तमेधाविभिस्सनकसनत्सुजातसनत्कुमाराभिधानैर्योगिप्रधानैश्चतुर्भिर्महद्भिरपरैरनेकैरपि परिवृतं, आश्रितविविधशाखाभेदैर्वेदैः कायसंयुक्तैर्गीयमानमहिमानं, सन्दर्शितसकलधर्मततिभिर्मनुस्मृतिप्रभृतिभिरष्टादशस्मृतिभिश्च मूर्तिमतीभिरतीवस्तूयमानं, ब्राह्मपाद्मप्रमुखैरखिलनिलिंपभुवनगमनकारणैः पुराणैश्शरीरभाग्भिर्वर्ण्यमानापदानं, भागीरथी, भीमरथी, भास्करकन्यका, मेकलकन्यका गोदावरी, सुवर्णमुखरी,कावेरी, मणिमुक्ता ताम्रमुक्ता, शरावती, सरस्वत्याम्रावती, वेगवती, गण्डकीकौशिकी, तुङ्गभद्रा,शोणभद्रा कनकासुज्योतिकाप्रभृतिभिः कलेवरसंहिताभिरापगाभिरुपास्यमानं, हिमालयसुरालयचन्दनालयमंदारादिभिर्लब्धगात्रैर्गोत्रैः, राराद्राराध्यमानं,समन्ततोवर्तमानानां लूनाऽभिमानानां योगिप्रधानानां सर्वेषामप्यभिमुखत्ववाञ्छयेवगृहीतसर्वतोवदनं, हाटकाद्रिमिव रत्नकटकशोभितं रुचिरमौलिञ्च देवशरणञ्च सागरमिव, सरस्वतीभर्तारं भुवनपतिञ्च समकरञ्च एकचक्रस्यन्दनमिव हंसवाहं महान्तञ्च अभिजातमपि नाभिजातं भगवन्तमरविन्दासनरविनन्दनस्सन्ददर्शतदानीं तत्रस्थाः वाणीशसकाशं प्रविशन्तं शोकवन्तं व्रीडानतकन्धरतया परमेष्ठिगोष्ठीस्फाटिककुट्टिमसौम्यतां सम्यग्वीक्षमाणमिव स्थितं वैवस्वतं तं विलोक्य अनवरतमपि दुरितकरनिकरशिक्षणनिरतः क्षणमपि स्वपुराद्बहिर्-

गन्तुमवकाशविहीन एव पूषकुमारो हिरण्यगर्भस्याभ्यर्णं किन्निमित्तमभ्युपयातीति नितान्तं महान्तश्चिन्तयामासुः ।

उन्नतश्रीजुषोऽजस्य सन्नतस्य सुरर्षिभिः ।
खिन्न एष पपाताङ्घ्र्योश्छिन्नमूल इवाऽङ्घ्रिपः ॥
रोदयति पापिनो यो वेदतनुसुतः प्ररोदिति स एषः ।
इति वेधस्सभ्यानामतिवेलं कलकलोऽभवन्महताम् ॥

तदानीं निखिलदेहिनां प्राणभूतः वासुदेव इव धनञ्जयसहायः पञ्चशर इव हरिवरकुमारः, भगवान्सदागतिस्तावत् सतां तेषां घोषं परिष्ठन्तं सपद्युपरुरोध ।

ततः कस्य * नियोगात्क×स्सुतं कस्य॰शुचान्वितम् ।
दोर्भ्यामुत्थाप्य तस्मै स पीठं प्रादत्त सादरम् ॥

तस्मिन्नासने समुपविष्टो धर्मराजो दुर्मना महीध्रो निर्झरधारामिव लोचनाभ्यामश्रुधारामुज्झन् पाहि मां भृशदुःखितं त्रिदशांमुख्येति द्रवयामासतराम् ।

आनन्दमाश्रितो लोके न कश्चिदपि रोदिति ।
समाश्रितशतानन्दो रुरोद शमनः कुतः ।
केन भवानभिभूत इदानीं केन भवान्यम ! रोदिति खिन्नः ।
लूनभयं कथयति विधाता दीनतमं किल सौरिमपृच्छत् ॥

अनन्तरं तरणितनयस्सविनयमिदं निगदितवान् ।

क्षमायां चतुर्वक्त्र रुक्माङ्गदाख्यो रमाजानिभक्तो नृपः कश्चिदास्ते।
मधुद्वेषिघस्ने मलध्वान्तभानौ विधत्ते स पूजोपवासादि सर्वम् ॥
लोकास्सर्वे तदादेशादेकादश्युपवासिनः ।
अद्वितीयं प्रपद्यन्ते तद्विष्णोः परमं पदम् ॥

कश्चिदपि जनस्समुद्रमिव शङ्कुसहस्रसंकुलं, वेश्यापतिमिव शूलकीलितं, सन्तुष्टजनमिव कण्टकाकीर्णं, पायसमिव शर्करासमाकुलं, वृषभमिव क्षीरवर्जितं, आकाशमिव क्रूराङ्गारकसंयुक्तं, मत्पत्तनपथं प्रति सम्प्रति न प्रतिष्ठते । ततोऽहं निर्व्यापारः कुड्यादविशेषोऽस्मि । अस्मदक्षरचणप्रवेकश्चित्रगुप्तो निरर्थान्पत्रसार्थानमार्जितवान् ।

सोऽवनीपतिशार्दूलः केवलां मामिकां पुरीम् ।
शून्यां न विदधातिस्म मान्यामाज्ञां च ते विभो ।

तस्मादस्माकमत्यर्थं प्रत्यर्थिनं पार्थिवन्तं लोकाध्यक्ष ! मंक्षु शिक्षयेत्याक्रोशितवन्तमन्तकन्तं नितान्तमनीषो भाषापतिरित्थमभाषिष्ट । तेन भागवतचूडामणिनेडारमणेन समं समवर्तिन् ! मा वैरायस्व ।

दुर्जय एव स निखिलैर्निर्जरवर्यैर्मदादिभी राजा ।
द्विजपतिवाहो यस्मान्निजभक्तान् वत्सवत्सदा पाति ॥
यावत्स्वभक्तलोके श्रीवत्साङ्कस्य विद्यते प्रेम ।
तावत्समुद्रजायां वैवस्वत ! नैव सत्यमेवेदम् ॥

हरये रोचते भक्तिर्भक्तिर्ज्ञानाय कल्पते ।
मुक्तये जायते ज्ञानं नृपस्तद्वैष्णवोऽभवत् ॥
स्मरामि विष्णुं शमनामृतीयन् मुरारये साधु नमस्करोमि
स विष्णुरेवाऽखिलदेववृद्धः प्रविष्णुरस्त्वित्यनघा श्रुतिर्हि ।
स्वस्मिन्कृतमपि मन्तुं क्षमते भक्तेषु न सहते रचितम् ।
कृष्णो ह्यनन्तसुगुणो 'विष्णोर्नु क' मिति वदत्यहो वेदः ॥

तस्य वैष्णवप्रधानस्य निषूदनेऽहं प्रवृत्तश्चेन्मामकीनानि चत्वार्युत्तमाङ्गान्यपि सत्वरमुत्तमेन सुदर्शनेन निकृत्तानि वात्यया पात्यमानानि तालफलानीवाधस्तात्पतिष्यन्ति । तस्मात् त्वं तेन सार्धंमूर्धाभिषिक्तेन सद्वर्येण विद्वेषं विहाय सहचित्रगुप्तस्संयमिनीं शमन ! याहि ।

निशम्य वचनं यमस्स तु विधेस्तमेषोऽब्रवी
न्न मेऽत्र पुटभेदनं पुनरहं गमिष्यामि भोः ।
सभाऽधिकमरुन्तुदं द्रुहिण तस्य ! पृथ्वीपते—
र्मुहूर्तमपि नो ह्यहं पटहजं सहिष्ये ध्वनिम् ॥

ईदृशेनाऽधिकारेण मम किं प्रयोजनं ? सम्प्रत्यहं प्राणान्विमोक्ष्यामीति यमुनासोदर्यस्समुदयं स्वीयौ दण्डपटौ पुण्डरीकसम्भवचरणाम्भोरुहसविधे निदधे । तदात्वे तु किं करणीयं मया साम्प्रतमिति नितान्तं हिरण्यगर्भंदर्भाग्रमनीषो वैणिकतपोधन एवं वाचमाचचक्षे ।

राजवरं कमलाऽऽद्दिने तं भोजय भो जनक ! त्वमुपायैः ।
भूपसुतो मुदितोऽथ भविष्यत्येष यथा निधिमेत्य निःस्वः ॥

इत्थस्ववचनतपस्विनाऽभिहितां सरस्वतीमुरीकृत्य करुणासरस्वती-पतिस्सरस्वतीपतिस्स्वकीयस्वान्तात् चञ्चरीकस्तोमश्यामल-कोमलकचपक्षां सुदक्षां अष्टमीतुषारघृष्टिसृष्टीकुशलनिटिलतलकलिता—ऽऽखण्डलनीलमयनिस्तुलतमालपत्रां पवित्रां रुचिरनयनयुगलविजितसुमयविकचकुवलयां मरकतवलयां चारुतरगण्डयुगलखण्डितवरदर्पणाव-लेपां मञ्जुलभ्रूचापां रत्नताटङ्कपत्रवालिकादिभूषापालिमिलितकर्णशोभां शब्दग्रहां तडित्प्रभविग्रहां तिलप्रसूनकेलाकेलिप्रवीणघ्राणां धृतवीणां शरदमरीचिमरीचिविकस्वरसरसीरुहदण्डादण्डितपण्डितवदनां मधुर-तरदनच्छदारुणिमविडम्बितबिम्बफलां अतुलां अतिविशददशनपङ्क्ति-निन्दितकुन्दमुकुलां धम्मिल्लकलितवकुलां उत्तमकम्बुगर्वसर्वंकषकण्ठ-देशां कान्तिविराजितसर्वाशां निष्ठुरतरसुष्ठुपयोधरधिक्कृतचामीकरकुम्भां रूपजितरम्भां सुष्टिमेयपरमरमणीयमध्यमां निखिलमहिलोत्तमां मञ्जु-लपुलिनतलातलिकुशलनितम्बां गमनह्रीणमरालनिकुरुम्बां वेतण्डशुण्डा-बाहुबाहुविसमर्थसक्थियुगलां अतीवमृदुलां अनङ्गनिषङ्गप्रतिमोद्दामजङ्घां ध्वनिजितपिकसंङ्घां पद्मपादां गतखेदां दिवमिव नक्षत्रमालालंकृतां भुवमिव बहुधामकाञ्चीमण्डितां अमरावतीमिव हरिचन्दनसुमनो-भिरभिशोभितां सुमेरोरधित्यकामिव हाटकतुलाकोटिविराजितां लङ्का-नगरीमिव सुवर्णक्षौमसंवीतां कामपि वनितां स द्रागद्राक्षीत् ।

❋ चतुर्थो विलासः ❋

कारणतो जायते जगत्यां कार्यं सर्वं कार्यतो न हेतुः ।
हा चित्रं सत्यलोकनेतुर्मानसपद्मात्पद्मिनी बभूव ॥
तद्गुणं को वदेद्धातुस्सभास्फाटिककुट्टिमम् ।
भृशं गीतियुता कान्त्या पिशङ्गीकुरुते स्म सा ॥
चक्रे तेषां नितम्बिनी विधिसभ्यानां विस्मयं हि सा ।
यस्माद्रेजे शिवाऽप्यसौ सलक्ष्मीरपि साधु भारती ॥
वामदृष्टेरमुष्यास्तु रामणीयकगन्धयः ।
स्वर्योषाः पद्मगन्ध्येतद्वपुरित्यूचिरेऽमराः ॥

एणीदृशस्तस्याश्श्रोणीतटस्य पृथिमानं शरीरस्य मृदिमानमपि केशपाशस्य नीलिमानमपि दशनवसनस्याऽरुणिमानमपि दरहसितस्य लावण्यमपि पयोधरकुम्भस्य दार्ढ्यमपि अवलग्नस्य कार्श्यमपि वर्ण-यितुमाचतुर्यं कस्य वा विद्यानिलयस्याऽपि न विद्यते ।

देहकान्त्याऽपि सद्वल्लकीवादनाद् ,
गेहयोषादि—तृष्णाविहीनानपि ।

मोहयन्त्या मुनीन् स्वात्मजाया विधि-
र्मोहिनीत्येव सोऽन्वर्थनामाऽकरोत् ।

तया सौन्दर्यवाहिन्या मोहिन्या पंकजयोने ! किं करणीयं मयेति सप्रश्रयं पृष्टः प्रहृष्टाऽऽत्मा स्रष्टा पुनः सुन्दरीं तां दुन्दुभिघोषया भाषया भाषतेस्म ।

कन्दरैर्बहुविधैस्समुपेतं स्कन्दतालसमलंकृतशृङ्गम् ।
सुन्दरं विविधधातुसमेतं मन्दरं त्वमुपयाहि नगेन्द्रम् ॥

दिनेशवंशस्थ उदारविक्रमो,
धनेशतुल्यः कृतलक्षणो नृपः ।
कुमारि ! रुक्माङ्गदसंज्ञया युतः,
क्षमां हि पातीन्द्र इवाऽमरावतीम् ॥

स पुनर्मानवाऽधीशः केनचित्किमिषेण शैलोत्तमं तं लप्स्यते । स त्वां समालोक्य प्रकामं कामशरविद्धो मम रमणी भव रमणीयमुखीति भवतीमतीव पुरा प्रार्थयति । तदानीं त्वं यदा यदाऽहं यं यं वरं वाञ्छिष्यामि तदा तं तं मह्यं मह्यधिप ! वितरिष्यसि यदि भविष्यामि तव योषिदिति भाषस्व । सोऽपि पृथिवीनाथस्तथाऽस्त्विति शपथं मन्मथविशिखमथितः करिष्यति । अनन्तरमनन्तदासस्याऽस्य-नन्ताऽधिपस्य तस्य कुटुम्बिनी भव नितम्बिनीश्रेष्ठे । ततः कमलेक्षणे ! क्षणे क्षणे क्षोणीनाथस्य तस्य त्वयि स्नेहो वर्धिष्यति । ततस्तव वशे

वर्त्स्यति । ततः कतिपयेषु गतेषु मासेषु सारसाक्षदिने भुंक्ष्व त्वं क्षमानाथ ! नो चेन्नीचेतरविक्रमस्य त्वदीयतनयस्योत्तमाङ्गं निश्शंकं निकृत्य मे समर्पयेति निश्चयं कथय । तदानीं सत्यवादी क्षित्यधिनाथस्स तार्क्ष्यवाहवासरे भोक्ष्यति चेतस्य तादृक्षं व्रतं विनंक्ष्यति । व्रतं रिरक्षुस्सुमाऽऽयुधसमानं कुमारं क्ष्मापतिस्स प्रमापयिष्यति यदि रमारमणस्सद्यः स्वमालयं समानेष्यति । यमोऽपि ततः प्रमोदं यावत्प्राप्नोति ।

अथ शतधृतिलोकान्निर्गता स्वर्गवासात्,
अधिसरणि समस्तान्मोहयन्ती स्वकांत्या ।
स्वनखरशिखरैस्सा वादयन्ती विपञ्चीं,
बहुतरुयुतमागात्सुन्दरी मन्दराद्रिम् ॥

स्त्रैणं प्राप्ता जनास्तत्र पौंस्नं प्राप्ता जना अपि ।
रूपमन्यादृशं तस्या वीक्ष्याऽलप्स्यत विस्मयम् ॥

विश्वाची च घृताची च दृष्ट्वा तां मेनकां च सहजन्यां ।
अपरोऽप्सरसां निकरोऽप्यपत्रपिष्णुर्बभूव बहुरूपाम् ॥

गात्रं नेत्रे केशस्तोमा विद्युन्मालातुल्यत्वं हि ।
पद्मौपम्यं भृङ्गैस्साम्यं गाते गाते गातेस्माऽस्याः ॥

इत्यम्बरप्रदेशे त्वत्यन्त व्याजहार सुविलक्षा ।
रम्भोर्वशीमुखा किल रम्भोरूरमरयोषितां पङ्क्तिः ॥

मन्दरगिरिवरधामां विधिपुत्रीदेवतां गिरिशनामीम् ।
तेजोनिर्मितपूषां धृतराज्ञीं सा ददर्श फणिभूषाम् ॥

अरविन्दभवपुरन्दरादिवृन्दारकवृन्दाराऽर्चितस्य तस्य शिवर्लिंगस्य पुरस्ताद्विविधरागसमेतं सुस्वरं गायन्ती वल्लकीमुल्लसन्तीञ्च पल्लवयन्ती फुल्लपङ्कजानना रमासमा सा सुखमासामास ।

भूभृतं सत्वसम्पन्नं वीक्षमाणाऽपि मोहिनी ।
भूभृतं सत्वसम्पन्नं द्रष्टुकामा बभूव सा ॥

भूपानां प्रवरस्तु जातुचिदसौ जिष्णुस्स विष्णुप्रियो,
धीरः कण्टकशोधने कृतमतिर्वीरं कुमारं निजम् ।
आदिश्य प्रणतं गजायुतबलं प्राज्यात्मराज्याऽवने,
सादिन्! घोटकमानयोत्तममिति प्राज्ञस्समाज्ञप्तवान् ॥

मेदिनीपतिवाक्यं तत् सादिवर्यो निशम्य सः ।
हयशालां विशालां स दयतिस्म त्वराऽन्वितः ।

स तावदनेकतुरङ्गमवरेण्ययुक्तायां अश्वकहीनायां मन्दुरायां तस्यां तिष्ठन्तं धराक्षेमकृता उत्तमलेखाश्रितचरणेन प्राप्तसुन्दरनन्दनेन गोपतिना संरक्ष्यमाणं सिन्धुसंभवमुच्चैश्श्रवसमिव स्थितं वाजिसत्तमं सादिसत्तमो भूपसत्तमसमीपं प्रापयामास ।

धरापतिरसौ जैत्रश्शराऽऽसनलसत्करः ।
हरिदासप्रमुख्योऽपि हरिमारोढास्म सः ॥

ततः परं चित्रतोरणालङ्कृता अस्तोकानेकपताकाऽऽच्छादितच्छायावत्तिमरीचिनिचयां अतिपरिमलकालागुरुधूपितां अश्वकैः मातङ्गकैः कुरङ्गकैः रासभकैः कुक्कुकैरितरप्रतिकृतिभिरप्यभिशोभितां मत्तसिन्धुरीमिव गन्धतोयसिक्तां दक्षपत्नीमिव बहुनक्षत्रप्रसवशोभितां अलंकारविद्यामिव सविकस्वरदीपकां अयोध्यामिव दशरथप्रियजनसंघनिबिडतां पङ्कजाक्षमूर्तिमिव महालक्ष्मीयुक्तां प्रतोलीं महीयसीं स महीक्षित्प्राविक्षत् ।

पर्वतो वह्निमान् धूमयुक्तत्वतो यत्र धूमोऽनलस्तत्र हीत्यादिकाम् ।
वाक्यपंक्तिं कश्चिद्भाषमाणान्नृपो न्यायदक्षान्पुरे वीक्षतेस्म स्वके ॥
अभिनवतामरसप्रतिमाक्षः क्षितिपतिरैक्षत कुत्रचिदेषः ।
षड्घषदेङ्गुण आद्गुण ए ओङिति पठतो विदुषो बहुशब्दान् ॥

अन्यशास्त्रमण्डलेषु पण्डितान्बहून्पुरे,
हर्षवानपश्यदेष तत्र तत्र भूपतिः ।
पाहि पाहि पाहि पाहि पाहि पाहि पाहि-
मामित्ययं जटां वदन्तमैक्षत द्विजव्रजम् ॥

का शीतलतटिनीति हि पृष्टः कश्चित्पुरेऽत्र केनाऽपि ।
काशीतलतटिनीति प्रश्नवचनमेव तूत्तरं चक्रे ॥
कोऽपगतबन्धुरिति सपृष्टः कश्चित्पुरेऽत्र केनाऽपि ।
कोपगतबन्धुरिति प्रश्नवचनमेव तूत्तरं चक्रे ॥

को भस्मलिप्तदेहः कस्सुन्दर इति च केनचित्पृष्टः ।
हार ॐ इति कश्चिदूचे प्रश्नद्वन्द्वस्य चोत्तरं त्वेकम् ॥
विष्णुर्भूत्वा वराहः पृथुतरदशनेनोदहार्षीत्पुरा कां,
काऽत्यन्तं नीलकेशान्कलयति धवलान्कः पतिर्निर्जराणाम् ।
नक्राऽऽक्रान्तो हरिं को मम भव गतिरित्याजुहावेति पृष्टः,
कश्चित्केनाऽपि तत्र द्रुततरमभणीत्कुञ्जरेन्द्रः * किलेतिः ॥

तदानीं नागरास्तावदधोक्षजमिव तार्क्ष्याधिरूढं वैयाकरणमिव प्रकृतिभावज्ञं नैयायिकमिव सकलगुणसमावज्ञं हालास्यनाथमिव अद्रसंगीतरसिकं मत्तमातङ्गमिव भृशदानयुक्तं दुर्वाससमिव बहुमन्युकारिणं शेषमिव महाभोगाश्वितं विश्वम्भरादासमपि विश्वम्भराऽऽधिपतिं नितान्तं प्रासादात्प्रेक्षमाणाः हर्षमग्नाः परस्परमेवमाचक्षत ।

अवरोधोदय—शैलान्निर्गच्छन्धरणिनाथराकेन्दुः ।
सकलकलासंम्पूर्णो गुणगणकिरणैर्जनान्सुरञ्जयति ॥
शतकोटिशस्त्रयुक्ता गोत्रामङ्गलकरश्च शतमखकृत् ।
प्राप्तसुवर्मो जिष्णुर्विशांपतिरयं बलारिरिव भाति ॥
भूतगणाऽवननिपुणो भूपवरस्सर्वमङ्गलोपेतः ।
भूभृत्समाऽऽश्रितोऽसौ सूतमुखनुतश्चकास्ति शंभुरिव ॥

अनेन नरपतिना मित्रशात्रवयोः परमसन्तोषः क्रियते ।

* कुम्, जरा, इन्द्र, कुञ्जरेन्द्रः इति चतुर्धा छेदः । विष्णुः कुम्भूमिमुदहार्षीत् । जरा नीलकेशान्धवलान्कलयति । निर्जराणां पतिरिन्द्रः । स क्राक्रान्तः कुञ्जरेन्द्रः गजेन्द्रः हरिं माजुहाव ।

विक्रमयुतो नृपोऽयं चक्रविहीनोऽपरोऽरविन्दाक्षः ।
कीर्तिनिलयोऽयमपरस्तार्तीयीकाक्षिवर्जितशशम्भुः ॥
रावण—विजिताद्धनदाद्रुक्मांगद—धनपतिस्समधिकोऽयम् ।
क्षितिपतिवृषोऽयमधिकश्शतमन्योर्दशमुखात्मजेन जितात् ॥
वनीयक—मुखादेतद्—वनीपकरादपि ।
यौगपद्येन निर्यान्ति वचनानि धनानि च ॥
खलिनीशिक्षणदक्षः खलु विप्रश्नाकरोत्यसावश्नम् ।
विमलात्मा च वदान्यः कमलापतिसात्करोति कनकचयम् ॥
स भयात्करोति विष्णोर्नमनध्यानार्चनाऽऽदिभिर्भूपः ।
एष प्रियाकरोति हि देशिकमस्य तु गुणा उपपरार्धे ॥
समस्तान्यपि वस्तूनि स्वामेव दधति द्युतिम् ।
रुक्मांगदेन संप्राप्तं कृष्णरक्तत्वमद्भुतम् ॥
हरिणोपेतवपुषा सुमनःप्रियकारिणा ।
तमोऽपहेन तुल्योसौ काष्ठोद्दीप्तिकृता नृपः ॥
अत्यन्त—वीर्ययुक्तस्सुमनोयुक्तः कला—निपुणः ।
सेवितगुरुसुर एष हि रत्नाकरमेखलां क्षितिं भुङ्क्ते ॥
आश्चर्यं रचयत्येष ऋतध्वजनृपाऽऽत्मजः ।
यद्राजाऽप्यर्थमा भाति सर्वज्ञोऽप्यब्जलोचनः ॥
कादम्बतुल्यः क्षणदाऽधिनाथश्शुभ्रांशुतुल्यः कलहंस एव ।
रुक्माङ्गदक्ष्मापतितुल्य इन्द्रो रुक्मांगदो निर्जरनाथतुल्यः ॥

परदारामाऽनुरक्तोऽसौ द्विजराजं मुखेन च ।
अवजानाति भूपालो हन्त ! नाप्नोति पातकम् ॥

रुक्मांगदराकेन्दुस्समस्ततमसामवोभवीयच्छत्रुः ।
चित्रं न तद्दिनिशं मित्रोपेतो विभात्यहो हन्तैतत् ॥

अहमहमिकया बलञ्च धैर्यं बहुधनता च कला कुलीनता च ।
मतिरपि चरितं वयश्च रूपं क्षितपतिसिंहमिमं विभूषयन्ति ॥

इत्याद्याः स्वीयगुणसनाथः पृथग्विधा जनकीया भारतीः क्ष्मापतिरसौ समाकर्णयन्वाधंकैरनेकैर्भो जैवातृकतुल्यवदन ! जैवातृकस्त्वं भवतात् । तुभ्यं स्वस्ति भूयादिति च विरचिताशीर्वादः, निजराजधानीमतीत्य ततस्तुरगेण तुंगेन सञ्चरमाणः बहुविधैः केदारकैर्मरिष्टताभदींमातृकान्देवमातृकान् कृष्णभूमान् पाण्डुभूमान् अनूपानपि देशान्विलोकयन् विधुतपापानि विमलापानि सरांसि बहुविधानि मध्येमार्गं विलोकमानः तत्र तत्र ग्रामतसु विद्यमानेन सर्ववेदेन सर्वशास्त्रेण ब्राह्मणेन महापुण्येन विरचिताशीर्वादः मौद्गीनानि तैलीनानि माषीणि मैहेयाणि शालेयानि अन्यानि क्षेत्राणि च गोचराणि कुर्वन् आसिकैर्धानुष्कैः शाक्तीकैर्याष्टिकैश्चागणिकैर्वागुरकैरपि मृगाणां निग्रहणं क्षिप्रं कुर्वद्भिः पुलिन्दवृन्दैस्तुन्दिलं कैलासमिव पञ्चास्ययुक्तं वैकुण्ठमिव हरिणोपेतं तटाकमिव पुण्डरीककुलसंकुलं अन्तरिक्षमिव रक्षगणाऽऽवृतं सुग्रीवमिव गजगवयशरभसेवितं दशग्रीवमिव बहुचक्षुःश्रवस्संयुक्तं भास्करमिव सहस्रघृष्टिसंयुक्तं

प्रावृट्कालमिव प्लवंगमजालकोलाहलविलसितं इतरमृगाणामपि अरण्यमरण्यानीगणं पश्यन् अष्टोत्तरशतयोजनान्यतीत्य प्रद्योतनसज्योतिषः वामदेवप्रभावस्य वामदेवाऽऽलयस्य तपोधनमुख्यस्य बहुशाखाविलसितामपि विशाखां पर्णशालां विलोचनपथस्य विषयीचकार ।

बहुशाखाऽऽगमयुक्तं तमाश्रमं परमहंससंयुक्तम् ।
वरसर्वतोमुखयुतं प्राविशदसौ स सत्यलोकमिव ॥

अहिनकुलं गोव्याघ्रं स हि काकोलूकमपि च निर्वैरम् ।
तस्मिन्नुटजे दृष्ट्वा विस्मयमाप नृपतिर्मुनिर्महिम्ना ॥

स्वविटपगतपत्रिशब्ददम्भात् स्वनिलयमागतमेनमाह्वयन्ती ।
पवनविगलितैर्ध्रुवं प्रसूनैस्तरुततिरर्चयति स्म पुष्पिताग्रा ॥

धामनिर्जितसूर्यस्य वामदेवस्य पादयोः ।
सोमभंडलवक्त्रोऽसौ हेमदंड इवाऽपतत् ॥

स वामदेवो द्विजराजशेखरश्शिवालयः कामजयी वृषस्थितः ।
क्ष्माभृतं पुण्यमतीवहृष्टहृत्तमादरादर्घ्यमुखैरमानयत् ॥

भो ! महाभाग भागवतप्रधानस्य वसुधाविबुधादिकानखिलान्वर्णानपि सुपर्णवाहवासरे विहितोपवासानारचयत विष्टरश्रवसो विष्टपं प्रापयतस्तवाऽऽगमनादाश्रमो मामकोऽसावतिमात्रं पवित्रो बभूव ।

सेव्यस्य सर्वमरुतां त्वयि चक्रपाणेः,
पद्मो न तुल्यमु रूपूर्णकृपानृपास्ते ।
आयुष्यमङ्ग ! भवते ध्रुवतुल्य ! भूयात्,
भद्रं तवाऽपि सततं कुशलञ्च भूयात् ॥

दिने दिने वृद्धिमुपेत्य नूनं तवैव कीर्तिर्महती बभूव ।
अपण्डितास्संप्रति ता त्रिलोक्यां कैलासधात्रीधरमामनन्ति ॥

दृष्ट्वा यशस्ते द्विरदाऽधिरूढं धात्रीश्वर ! त्वां तरसा स्वयञ्च ।
गत्वोर्ध्वमैन्द्रं गजमध्यरूढदलच्चदेहस्स विभाति यस्मात् ॥

नारायणस्य शोभाभिः क्षीराब्धि श्यामलीकृतम् ।
सार्वभौम ! यशस्तेऽद्य पूर्वरूपयुतं व्यधात् ॥

सोममरालस्फटिकप्रमुखानि श्वेतवस्तूनि ।
यशसाऽरिन्दम! भवतो भृशधावल्यं वहन्ति खलु ॥

तव प्रतापेन नरेन्द्र नूनं विद्राव्यते तीक्ष्णकरो विजेतुम् ।
तस्मात्सभीतश्शरणार्थ्यजस्रं भ्रमत्यशेषेषु जगत्सु वेगात् ॥

प्रतापसाम्यं तव नूनमाप्तुं पानीयदानं प्रतिवर्षमर्कः ।
तारच्यते मासचतुष्टयेऽपि तस्मादभूदर्यमनामकस्सः ॥

तुभ्यं वर्णद्वितयं दत्वा देहीति वाचनकाः ।
भूपतिसिंह! त्वत्तो गृह्णन्त्यगणितसुवर्णानि ॥

अचलमोदकरेण श्रीयुक्तेन च सहस्रगुणा ।
बह्वात्मना च हरिणा तुल्यस्त्वं वसुमतीनाथ ॥

इच्छन्वर्धयितुं साधून्स्वच्छप्रज्ञान्महीपते !
वर्धनं कृतवांस्त्वं हि दुर्धियां पापिनां भृशम् ॥

कान्तौ सोमः क्षान्तौ भूमी रूपे कामश्चापे रामः ।
धैर्ये मेरुश्शौर्ये शक्रस्त्वं गाम्भीर्येऽयञ्चाम्भोधिः ॥

चातुर्येण तव क्ष्मेश ! चातुर्वर्ण्यं न चाऽधुना ।
धर्मोऽनुष्ठीयते स्वीयः कुग्रहाः किल नासते ॥

षाड्गुण्यैश्वर्यपरिपूर्णः स्वकीयदाससामीप्ये वर्तमानो रमानाथो निर्जितरागद्वेषादिप्रत्यर्थिसैन्यस्य प्रह्लादौपम्यस्य त्रैलोक्यविसृमरकीर्तेर्भवतस्सततं सान्निध्यं विधत्ते त्वदीयान्ववायस्य पौरोहित्यकारी मुनिवरिष्ठो वसिष्ठो भूपतिश्रेष्ठ तव प्रसादं सदा वनुते ।

त्वद्राज्ये निखिला द्विजाश्च लसिताः श्रौत्रेण गोत्रेश्वर !
श्रुत्याद्य सु कलासु कौशलमलं याता विधूतांहसः ।
धीराश्चापलवर्जिते हृदि हरिं ध्यायन्ति गेयं सुरै—
श्शौचाचाररता वृथोक्तिकथने मौनं सुपीनं मताः ॥

सुन्दरैस्त्वां गुणैर्युक्तं विन्दतिस्म सुतं नृप ।
योऽघहीनस्स एवाऽलं श्लाघनीयो ऋतध्वजः ॥

अंगादिदेशा गिरयश्च तुंगा गङ्गादिधुन्योऽप्यधिकं जनाश्च ।
यस्यां मणुस्सागरमेखलायां तस्यां गुणास्ते नृपते ! न मान्ति ।

पञ्चमो विलासः

इत्थमत्यर्थं समर्थेन तेन क्षोणीगीर्वाणवरेण्येन सुतरां पर्यान्वितो गुणाश्रयस्स नृणामधिपतिः कृताञ्जलिस्तमेवमवादीत् भो तापसवाद्वूक मन्देतरसन्देहः कश्चिन्मच्चित्ते चिरेण वर्तते तमेतर्हि कृन्ततु मम पितृस्थानीयस्सर्वसहान्भवान् ।

पञ्चाला अपि कुरवो मगधा निषद्वास्तथा विदर्भाश्च
अन्येऽपि कोशलानां मम किल न समास्समस्तदेशा भोः ॥

धरित्रीशा अशेषाश्च वशे मम तिष्ठन्ति बहुकोट्यो रथकट्याश्चिवाजोच्चयोन्नता गजतास्सदागतिवेगाभ्यद्वीयांनि पादातान्यसंख्येयानि च मम विद्यन्ते प्रजास्सर्वाश्च निदेशं मदीयं मूर्ध्ना बिभ्रति ।

सुमुखी कुशला वधूश्च मे सुदती नितरां पतिव्रता ।
सुगुणैर्बहुभिर्विभूषिता विविधाद्भुतकर्मकारिणी ॥

तत्तु सुचरित्रं कलत्रं मम यत्र यत्र पदयुगलं निदधाति तत्र तत्र वसुन्धरानिधिं दर्शयति किञ्च मम पाणिगृहीती कृपीटयोनिना विना तण्डुलानोदनं पचति । तदोदनं मोदयुक्ता मत्पत्नी सत्पदलं विमलाक्षया भुक्त्याक्षया प्राशयति ।

अब्रवीदश्चोर्ध्वजुस्संज्ञुविग्रह् कुणिश्च जनुषान्धः ।
अन्येऽपि कुरूपजुषो झषकेतुनिभा भवंति तद्दृष्टाः ॥
तनयोऽपि मे वदान्योपेतस्सुमायुधस्सुरूपः ।
सप्तांतरीपजेता भृशं सुमेधा इभायुतबलश्च ॥

एतादृशभाग्यं मया भगवन्नुद्भवेऽमुष्मिन् कृतेन सुकृतेनाऽऽसादितं वा जननान्तरे विहितेन वा सम्यगेतन्निश्चित्य विपश्चिद्वर्यं साम्प्रतमनुकम्पया कथयतु भवानित्युक्त्वा कृष्णैकशरणस्तूष्णीकाम आस्तेस्म ।

इति गदितः क्षितिपतिना श्रुतिविद्वर्यो मुनिश्चरितमस्य ।
हस्तामलकवदखिलं ध्वस्ताघो ज्ञानचक्षुषाऽद्राक्षीत् ॥

तदनु विशांपतिमेतं कृशानुतेजास्स तपोधनप्रधान—स्सावधानं श्रूयतामित्यामन्त्र्य तस्य व्याहर्तुमुपचक्रमे । भो सार्वभौम ! पूर्वस्यामुत्पत्तौ त्वं पादजातो वैतनिको जातुचित कस्यचित्तीर्थयात्रापरस्य धात्रीसुरस्य भारिको भूत्वा तेन साकं नाकाधिपैरर्चितेन पिनाकपाणिकिंगेन समलङ्कृतं मन्दराह्वयं शिलोच्चयमगच्छः । तत्र कस्माच्चित्पौराणिकात् धरणिबृन्दारकाच्छेषशयनप्रियस्य तावदशून्यशयनाभिधानस्य व्रतप्रधानस्य कस्यचित्प्रभावो भवतैकतानमानसेन सश्रद्धं समाकर्णितः । ततः परं तस्मादहार्यादगारं स्वकीयमासाद्य व्रतश्रेष्ठं तद्यथावत्समन्वतिष्ठो धर्मेण तेन भूपेदानीमन्यदुरापेयं भूतिस्त्वया प्रापि । एतस्याञ्जनावपि जनार्दनचरणराजीवपूजकोसि । इतः परं भवतो भवभीतिर्न

श्रविता । इदानीमपि प्राग्जन्मविलोकितं मन्देतरमहिमानं मन्दरधराधरं लोकपालोपम ! विलोकयतु भवान् ।

तद्वचस्तु निशम्यास्य पदद्वयं प्रणिपत्य सः ।
सद्वयंस्योटजात्तस्माद्विद्वद्वर्यो विनिर्ययौ ॥

समस्तलोकेश्वरमिन्दिरेशं मम प्रभुं यो गिरिराडरोह ।
तमद्य हन्मीति भृशं रुषेव स मन्दराद्रिं सधनुः प्रतस्थे ॥

वामदेवं सुगोत्रस्थं प्रवृत्तोऽपि समर्चितुम् ।
वामदेवं सुगोत्रस्थं पृष्ठे चक्रे स भूपतिः ॥

ततः परं मध्येसरणि धरणिपालोऽसौ कुबेरमन्दिरमिव मकरकच्छपविराजितं निषङ्गमिव नालीकपूरितं, धृतराष्ट्रमिव धार्तराष्ट्रव्रातशोभितं, वैकुण्ठमिव मधुसूदनविराजितं, समराङ्गणमिव बहुकबन्धशोभितं तटाकशतं पश्यन् रुचिरवेणियुक्तां, साधुद्विजपङ्क्तिसेवितां, पद्ममुखशोभितां, मनोहरमध्यतटां, सुमकरां, निष्पंकां, आवर्त्तनाभिशोभितां, अति ललितपुलिनजघनां, आश्रितांगजतापहारिणीं, रुचिरनारीमिव स्थितां, तरङ्गिणीततिमपि वीक्षमाणो महेश्वरमहोक्षमिव मनोरमशृङ्गसंयुक्तं, दाशरथिमिव साधुगुहाऽश्रितं, उत्तमरमणीदेहमिव स्थविष्ठनितम्बयुक्तं, शब्दशास्त्रमिव नानाविधधातुपरिष्कृतं, कर्मसाक्षिणमिव सहस्रपादसहितं, स्निग्धमध्य रचितसुचिरभ्रमणसम्भूतानुपरतस्वेदसम्पातशङ्काकरान् निर्झरान् समुज्झतं, मारुतपूरितनिस्वनन्मस्करमुक्ततया

स्वकीयशृङ्गालङ्कारभूतं, शृङ्गारयोनिपरिपन्थिनं प्रकाममिव गायन्तं, नारायणमिव धात्रीसहितं सोमशेखरमिव हेमवतीयुक्तं, हैहयदेशमिवाऽऽर्जुनविराजितं, पाण्ड्यदेशमिव कृतमालोपेतं, लङ्कापुरमिव पलाशकोटिपरिवृतं, किष्किन्धापुरमिव पनससुषेणयुक्तं, राघवसदनमिव वैदेहीसमलंकृतं, कुलालसदनमिव बहुकुम्भीसम्पूर्णं, वैजयन्तमिवेन्द्राणिकाविभूषितं, हनूमन्तमिव चिराऽऽयुस्संयुक्तं, भूसुरमिव गायत्रीविभूषितं, सौभरिमुनिमिव बहुकुमारकसमाश्रितं, बाणासुरमिव बहुकरजविराजितं, अरण्यमिव वानप्रस्थशोभितं, जलनिधिमिव बहुग्राह्युपेतं, पङ्कजमिव भृङ्गयुक्तं, कण्ठीरवमिव केसरविराजितं, नारीनयनमिव सुशोभनयाञ्जनविभूषितं, पार्वतीसमीपमिव सुब्रह्मण्यविराजितं, केशवनिवेशमिव न्यग्रोधलसितं, सङ्गीतमिव बहुतालयुक्तं, अन्यैश्च पादपैरश्रङ्कषैस्समलंकृतं, तटाकमिव लक्ष्मणासमाश्रितं, शङ्करहस्तमिव सारंगालंकृतं, कैटभारातिहस्तमिव चक्रविभूषितं, जनकमहीपतिमिव शुकसेवितं, चोलदेशमिव मायूरविराजितं, अपरैश्च विहङ्गमैरलंकृतमतीवसुन्दरं मन्दरधराधरमाससाद ।

क्षोणीनाथेन तेनैकं नीलकण्ठं दिदृक्षुणा ।
वीक्षिता मन्दरप्रस्थे नीलकण्ठास्सहस्रशः ॥

अवरुह्य हयात्तस्माद्वसन्मन्दरतटे स तु मुहूर्तम् ।
तत्र फलानां तृप्तो मित्रकुलभवोऽच्युतस्य सस्मार ॥

तदग्रे स्थितं शम्भुलिङ्गं दिदृक्षुस्सदग्रे सरोऽयं हयं तत्र बद्ध्वा ।

तमारोहणैरारुरोहाचलेन्द्र, समाधिं यथा योगिवर्यो यमाद्यैः॥
गुरुजनप्रियस्थानमुन्नतं भजति हीत्यलं बोधयन्नसौ।
नृपतिरागमद्रिप्रवाक्यतस्सपदि मन्दराद्रे रधित्यकाम्॥

शूलायुधेन सहितस्य गजाश्रितस्य,
स्थूलाच्छभल्लसहितस्य च खड्गिनश्च।
भूमीभृतस्सुमहतश्शिर आरुरोह स्वामी,
नृणां सपदि यः किमुताऽपरेषाम्॥

स गिरेरधित्यकायां जगतीनाथो विधातृदुहितृकृताम्।
अतिमधुरस्वरयुक्तां श्रुतिसुखदात्रीं किलाऽशृणोत् गीतिम्॥
नागवरालिमुखां किल तस्या रागवरालिमलं स निशम्य।
कम्बुसमानगलात्परिजातामम्बुजदृष्टिरसावचिचिन्तत्॥
आर्या गीतिः क्रियते नार्या सुस्वरयुतं कयापीयन्तु।
श्रोतव्याऽद्य मयेति प्रीतस्वान्तस्स तत्समीपं प्राप॥

तदनु मदनविरोधिसन्निधिमधिवसन्तीं सीमन्तिनीवरिष्ठां परमे-ष्ठितनुजां मनुजाऽधिपतिरयं नलिनायताक्षीं ईक्षांचक्रे।

एष मद्द्वेषिणं शम्भुं सिषेविषति भूमिपः।
इति क्रुधेव मारेण विद्धोऽसौ मूर्च्छितोऽपतत्॥

योषा वराङ्ग्यः पुरुषान् जगत्यां विमोहयन्तीयमहो शिवाक्षी।
अद्याधिपास्याऽपि च सारसाक्षिस्तं भूपतिम्मोहयतिस्म चित्रम्॥

सा विधिपुत्री मणिमकुटश्रीसेवितमाकृत्यवमितमारम्।
मौक्तिकमालाविलसितकण्ठं सूक्तिमपश्यत् क्षितिपतिवर्यम्॥

सा तदानीं तातभाषितं स्मृत्वा प्रकृत्या चारुरयं रुक्माङ्गदाऽभिधानो वसुधापतिरेवेति मनसि कृत्य क्षित्यधिपं समया स्थित्वा रमया तुल्या सर्वाङ्गीणसौन्दर्ययुक्तं आप्रपदीनसुन्दरपटभूषितं गौरीरमणमिव कमलपाणिं पयोनिधिमिव बहूर्मिकाऽलंकृतं वाक्षिभवनमिवाङ्गदशोभितमिमं नाभिजन्मतनूजा व्याजहार। उत्तिष्ठ भो भूपतिश्रेष्ठ! त्वमिदानीं मदाश्लेषाभिलाषुकश्चेदहं गृहिणी भविष्यामीति।

उक्तिं निशम्य मधुरां चतुरास्यपुत्र्या
उत्थाय पृथ्व्यधिपतिः प्रतिलब्धसंज्ञः।
सौभाग्यवान्समवलोक्य स तामतीव—
शोभावतीमिति स चिन्तयतिस्म चित्ते॥

किमेतत्प्रफुल्लारविन्दं मुखं किं किमेतावुभौ हेमकुम्भौ कुचौ किम्।
किमेतौ च मोचाप्रकाण्डौ किमूरू इदानीं तु संदेहगामी भवामि॥

दृश्यन्ते भुवि पादपाश्च निखिलास्तत्तद्दलाद्यैर्युता—
श्चित्रं हन्त! विलोकयामि कदलीवृक्षोपरीहाऽधुना।
एकं बोधितरुच्छदं वटदलं चैकं द्वितालीफले,
एकं बिम्बफलं च कुन्दकलिका नीलोत्पले द्वे अपि॥

असावकम्पा न किल क्षणप्रभा बिसारसा नांबुनिधेश्च पुत्रिका।

मानस्य कर्त्री न च हेमपुत्रिका स्त्री नव्यसौन्दर्ययुतैव काचन ॥

पयोभ्रमेण स्मितधाम्नि हंसवयोभिगच्छन्ति पिपासवोऽस्याः ।
चयो जवात्पुष्पलिहां च वक्त्रं पयोजबुद्ध्या समुपैति मत्तः ॥

तापेन भानुर्घनदो घनेन चापेन शूरस्सलिलेन सिन्धुः ।
कोपेन सिंहः कलभो मदेन रूपेण भातीयमरालकेली ॥

ह्लादिनीप्रतिमांगीं तां ह्लादिनीशात्मजासमाम् ।
ह्लादिनीपाणितुल्योऽसौ मेदिनीशोऽभ्यभाषत ॥

त्वदास्यसायुज्यमवाप्तुमादृतोऽवदातगुर्मेचक—शुभ्रपक्षयोः ।
शंके करोतीत्युपवासपारणे यत्कार्श्यवृद्धी भजते तयोरसौ ॥

सुवासने लोचनसौख्यदायके तवाननाब्जे सति पङ्कजं परम् ।
किमस्ति तच्चेन्मधुना सुगर्वितं सुमञ्जुले तेऽस्त्यधरे तदप्यलम् ॥

हे तरुणि! स्मितशोभिनि! नूनं शीतघृणिस्त्वयमेक एव ।
त्वद्वदनेन समत्वमवाप्तुं पक्षगणैस्तनुते भृशवैरम् ॥

भद्रांगि मुक्तास्तव दन्तपङ्क्तिभिर्विद्राव्यमाणाश्शरणं सरित्पतिम् ।
गत्वाऽऽशुशुक्ता अभवन्ध्रुवं भिया तत्वा ययुस्तादृशनाम ता अये ॥

अधरात्ते प्रवहन्तीं मधुरसुधामयि ग्रहीतुमनसा नूनम् ।
अंबुपतिना विनिहितः कम्बुवरो नीलकेशिकण्ठोऽसौ ॥

अये तन्वङ्गि ! सङ्गीतनिपुणे ! त्वत्सङ्गमलोलुपोऽस्म्यहम् ।

हेमतुल्यमनोज्ञाङ्गि ! श्यामकेशिकसंयुते ।

अभूश्चेन्मम भार्या त्वमभूवमतिसौख्यभाक् ॥

वद्वाणीमाकर्ण्य सुश्रोणी सा क्षोणीपालन्तमभाणीत् हे मूर्धाभिषिक्तसत्तम ! "त्वया वयमानाम्बराण्यामरणानपि तुभ्यं दास्यामीति" प्रतिज्ञा भवता रचिता यदि भवतो मनीषितमहं पूरयिष्यामि ।

इत्यजात्मजया प्रोक्तः क्षित्यधीशः प्रहृष्टहृत् ।
रत्यधीशशरैर्वद्धस्सत्यं चक्रे तथाऽस्त्विति ॥

ततश्चतुर्वक्त्रदुहित्रे स्वस्य वृत्तान्तमाख्यातुं शक्रतुल्यविक्रमश्चक्रपाणिदासश्चक्रवर्ती स क्रमेण प्रचक्रमे ।

ऋतध्वजाख्यो मम तातपादो रुक्माङ्गदाख्योऽहमरालकेशि !
सन्ध्यावली नाम सुकोमलाङ्गी मम द्वितीयाश्रमहेतुरासीत् ॥

धर्माङ्गदाह्वययुतेन महाबलेन पुत्र्य—
स्मि पङ्क्तिरथवत् क्षितिजासखेन ।
अत्रागतेन निटिलेक्षणवीक्षणार्थं दिष्ट्या—
ऽधुना सरसिजाक्षि मयेक्षिता त्वम् ॥

कस्य पुत्री त्वं किन्नामधेया किमर्थमेतद्गिरिश्रीधरशिखरमासदसि सरसिजमुखि ! निखिलमुदन्तमपि सविस्तरं कृपया कथयाऽधुनेति निगद्य वचनस्तूष्णीको बभूव स भूपतिः ।

ब्रह्मजा नृपसिंहस्य सिंहसंहननस्य यत् ।
वाक्यमाकर्ण्यं तं सोचे नाक्यधीश्वरसन्निभम् ॥

अहं पुनरम्भोरुहसम्भवस्य स्वान्तादुत्पन्ना मोहिनीनामधेया । मत्पिता मां पृथ्वीपते ! कथयामास, वत्से ! त्वमेतर्हि सत्सेवितं मन्दराभिधानं धरणीधरप्रधानं गच्छ । तच्छैलमचिरादुचिरावयवश्शुचिराहितलक्षणो रुक्माङ्गदो नाम भूमिनायकप्रवेको निमित्तेन केनचिल्लप्स्यते । स त्वां परिणेष्यतीति ।

गिरा विधेरेतदिराधरे श्रितस्मरासुहृत्सन्निधिरागमे स्मिते ।
सुरागयुक्ता मुदिरागमे यथा चिराय चातक्यभिरामराडहम् ॥



षष्ठो विलासः

स वामाद्यया तयेत्युक्तो विवाहार्थं तु कौतुकम् ।
न केवलमगाच्चित्ते स्वके हस्तेऽपि दक्षिणे ॥

तदनु वैयाकरण इव पाणिनिबद्धमङ्गलसूत्रशोभितः, वररुचिरिव रुचिरतरवाक्योत्पादनचतुरः, पतञ्जलिरिव साधुभाष्यः, महीपतिरसौ गृह्योक्तविधानेन विधातृकुमारीं तां स खलु मनीषी पर्यणैषीत् ।

भूपतिर्धार्मिकोऽप्येष पापमेकं तदातनोत् ।
क्षत्रियस्तूपयेमे स पुत्रिकां ब्रह्मणो यतः ॥

परिणीतवत्यमुष्मिन् धरणीशे तां सुरा इति प्रोचुः ।
अतिरूपौ स्त्रीपुंसौ रतिमदनाविव भृशं विभात इमौ ॥

तदानीं निखिलभूपनिकुरम्बस्य जम्पत्यो रामणीयकमविरतं विलोकयितुं विलोचननिमीलनराहित्यमत्यन्तं साधनमासीत् ।

नरपतिमाप्तुं कान्तं चिरराज्ञाय स्पृहायुता विधिजा ।
प्रापत्सदूब्रजशरणं गोपं दुष्टपशुहरणमङ्गो रमणम् ॥

ततः परं तत्रत्यानुन्नतवृक्षान् वृक्षकांश्च पश्यन्तावन्योन्यसमीक्षमाणावामलकानि जम्बूनि फलान्यन्यानि च वृक्षानवचिन्वन् तन्वङ्ग्या तया

तानि सादरं खादयति स्म । मल्लिकाः जातीः करवीराण्यन्यानि पुष्पाणि ग्यपि पुष्पपूगकसदृक्षः प्रगृह्य महाधीशोऽसौ तस्याः केशहस्तं स्वहस्तेन निजयोषितो भूषयाञ्चकार अमन्दानन्दतुन्दिलोऽसौ मन्दरगिरिशृङ्गस्थं पुंनागके गुलिङ्गरूपिणमङ्गनया स्वस्य साकं गुणनिलयः प्रणनाम ।

अवमन्तुं प्रवृत्तोऽसौ भवं परमसौख्यदम् ।
नोनवीतिस्म भूपालो भवं ❀ परमसौख्यदम् ॥

अथाऽसौ पार्थिवो निजनगरं जिगमिषुर्मोहिन्या सार्धं महीध्रात्स्माद्वरुह्य तस्य तावदुपत्यकायां तिष्ठतस्स्वकीयघोटकवरिष्ठस्य नेदिष्ठो बभूव ।

काचित्तदानीं गृहगोधिका*स्त्वका नीचां,
जनिं मोक्तुमिवाऽधिकं जवात् ।
अयात्कुतश्चित्कुहराद्धरापतेर्हया-
ग्रिमस्यास्य खुरं खुरोपमम्+ ॥

स तु तुरङ्गमसत्तमस्तदानीमेवा मानुषाणां वपुषि निपत्य दोष सुत्पादयति तस्मादस्मत्प्रभो रुक्माङ्गदस्य संमतं दुष्टसंहारमहं करोमीति विमृश्येव मुसलीं तां पदेन जघान । स तु जगतीपतिवर्योऽसौ दुर्विधनमूर्तिमिव गन्धर्वपीडितां व्रातस्विनीभिवोत्सुक्तरक्तीकीलां, मुसलीं तां सुधांशुसोदरदासो नेत्रयुगलस्येव कारुण्यरसस्याऽपि पात्रीचकार । ततस्ता-

❀ पूर्वार्धे, परं असौख्यदम् इति छेदः उत्तरार्धे तु परम-सौख्यदम्
इति वकत्रयम् *गृहगोधिका मुसली, ×खुरः शङ्कुः,

मनोकहस्य कस्यचित्पलाशं विपुलाऽधिपतिरधिरोप्य मूर्च्छितायास्तस्याश्श्रममपनिनीषुरयि रत्नतिलकयुक्ते ! जलकमानीयतामस्त्राय त्वयेति जायां स्वीयां सन्दिदेश ।

मोहिन्यवतारगदैस्याहितलीलां स्वयं च कर्तुमिव ।
ऽयतरम्मोहिन्यमृतं जितसारसभाक्षि गोपतेर्हस्ते ॥

ततः कृपावर्षिणा राजर्षिणा परमभागवतेन तेन शीतलतरैस्सलिलैः प्रोक्षिता बभूव सा गृहगोधिका ।

विचित्र—मिद-मुर्वीभुगचिराद्—गृह—गोधिकाम् ।
त्यक्तमूर्च्छां चिकीर्षुस्सन् मुक्तवान्यद्विषैस्सताम् ॥

ततस्सद्यो मुसली सा विश्रान्तिमिव पूर्वस्मृतिमवाप्य तमेनमेवमाचचक्षे ।

पूर्वस्मिन्वजनने गृहायुतयुते शाकल्यसंज्ञे पुरे,
चार्वङ्गी मुखजस्य कस्यचिदहं पुत्री धरित्रीश्वर !
उर्वर्थो मम नायकस्तु तरुणो वाराङ्गनासङ्गमं,
कुर्वन्वाढमुदास्त मय्यथ मया चिंता दुरंता कृता ॥

अहं पुनस्तत्र नगरे कुत्रचिद्वसन्ती कान्तवशीकरणभेषजदात्रीं, क्षयादिकामयापहन्त्रीं, काषायवसनावृतां, श्रुतिमिव जटामण्डितां, दशरथसभामिव सुमन्त्रशोभितां, सरस्वतीमिव पद्मासनाश्रितां, श्रमणीं काञ्चिदासाद्य प्रणिपत्य मम पत्युरुत्कृष्टं नागेयमङ्गुलीयकं तदीयचर-

णे न्यक्षैप्सम् । सा तु हेतुं मदागमनस्य प्रतीच्छ्या दृशा झटिति विज्ञाय निद्राणस्य त्वद्रमणस्य तस्यामिदं स तु भवत्या वशगस्तूर्णं भविष्यति । पूर्णचन्द्रमुखीति चूर्णं किमपि मह्यं वितीर्णवती । मयापि तत्तथैवाऽकारि

निद्राणो मल्लिप्तचूर्णस्तु भर्ता सद्रागत्युग्रक्षयव्याधिमाप्तः ।
भो मे क्षीणोऽहन्यहन्येष आसीत् श्यामे पक्षे यामिनीशो यथाराट् ॥

ततस्तं रोगमसहमानं सर्वंसहापते हाहेत्यत्यन्तं क्रोशन्तं कान्तमहमवोचम्—

त्वमिदानीं रोदिषि किं मम शुभमशृणोषि हि स्म जाल्म पुरा ।
वचनं दुश्चरितं मा रचयेत्यामयमजीजनमतस्ते ॥

इतः परं वाराङ्गनासंगतिं यदि त्यक्ष्यसि भवन्तमुल्लासं करिष्यामीति सोऽपि तथैवाऽस्त्विति प्रेत्यश्रौषीत् ।

तदनु निगदनं मे स्वात्मनो भूमिनाथा—
वदमपि गदबाधां चामयघ्नीमहन्ताम् ।
गदशमनदचूर्णं प्राददात्सादरान्मे तद्—
तददिशमिदमोकः क्षिप्रमेत्य प्रभोर्मे ॥

स पुनस्तद् भैषज्यमुपभुज्य स्वीयं यक्ष्माणं रूपाजीवाभोगापेक्षां च युगपदुज्झांचकार—

एषा गदं सञ्जनयां बभूव मे योषा त्विति क्ष्माप मुहुस्स मय्यलम् ।
रोषाद्विवौष्ठक्षकुचौ रदैर्नखैर्भूषद्वयमूर्तेरदशन्ममदं मे ॥

मम भृशं वशंवदेन तेन समं सुचिरं रंरम्यमाणाऽहं कालधर्ममासाद्य भर्तृवशीकरणकलुषेण पञ्चदशयुगानि तान्त्रभाण्डकनामधेयं निरयमनुभूय गृहगोधाऽभवम् पूर्वं भवता भवतापहारिणि सुपर्वस्रोतस्विनीसरस्वतीसंगमे द्वादशाब्दफलदाऽयां श्रवणद्वादश्यामुपवासो विहितस्तत्फलं सम्प्रत्यनुकम्पया महौदार्यं वितीर्य मह्यं मामुद्धरेति धरेश्वरं तं नितान्तं पुण्यं तद्वाचा ययाचे ।

भवद्दरमदिशत तस्यै श्रवणद्वादश्युपोषणं राट् ।
साऽपि प्राक्तनमखिलं पापमिव स्वं वपुश्च जहौ ॥

सद्योऽसौ दिव्यसंहननं समासाद्य पुष्कराक्षपार्षदसमाजैस्समानीतं, मरकतमयस्तम्भसंयुक्तं जम्भवैरिनीलसोपानविराजितं, सुधाकरधवलमुक्तादामशोभितं सहकारमहीरुहमिव मञ्जुलप्रवालावलिपरिष्कृतं, पुरुहूतहस्तमिव वज्रमण्डितं, पाण्डवभवनमिव रुचिरपाञ्चालिकालङ्कृतं, दुर्योधनसैन्यमिव, गाङ्गेयशकुनिमण्डितं, पुष्पकसमानं विमानमधिरुह्य शाश्वतमिन्दिरावल्लभमन्दिरमविन्दत । अथ पृथिवीपतिरयं जवनं निजं वाजिनमजतनुजया समं समारुरोह ।

अश्वश्चकार गन्धर्वं मूर्तिर्यस्य क्षितीशितुः ।
के वा तं रूपनिलयं न वदेयुर्मनीषिणः ॥
विलसत्कर्णसंयुक्ता बलवत्सैन्धवाश्रिता ।
पयोजासनजा रेजे सुयोधनचमूरिव ॥

ततस्स महीशो देशात्तस्मान्निष्क्रम्य, मध्ये रथ्यति महद्भिर्मुक्ताहारैर्मण्डितां, तिलकालङ्कृतां, विलसत्कोकिलनिस्वनां श्रुतिकलापशोभि-

तामाश्रमसंहतिमामोदयुक्तस्समवेक्षमाणः स्थानीयं स्वीयमाययौ । तदा रामायणमिव समाश्रितसुन्दरकाण्डं, भागवतमिव मनोहरस्कन्धशोभितं भारतमिवाऽर्जुनधर्मकीर्त्या विराजितं, काशीक्षेत्रमिव मणिकर्णिकाभूषितं, हालास्यक्षेत्रमिव सुन्दरमूर्तिशोभितं*सुवर्णपद्मिनीसहितं च भूपतिं नागवायनदासं नागरिका दृष्ट्वा हृष्टा बभूवुः ।

निशानाथवक्त्रां शुभां मोहिनीन्तां,
निशाम्याखिलाश्चिन्तयन्ति स्म पौराः ।
श्रितावन्यथीशोर्वशी वा सुकेशी,
घृताचीति रम्भाऽथवा मेनकेयम् ॥

तूष्णीमिवाऽऽप्नविशिखामेणीदृशमवेक्ष्य
यावद्दाक्षन्कुरन्योन्यमेवं पौरास्सुविस्मृताः ।
असौ राजकराऽऽश्लिष्टा सुसौम्यधिषणोज्ज्वला ।
भूरिभा मञ्जुघोषाढ्या द्यौरिव भ्राजतेऽङ्गना ॥
सुन्दरत्नेत्रगा नेत्रानन्दकृच्छीलशोभिता×।
लसन्मलयजोपेता कसत्येषा तु भूरिव ॥

*हालास्यक्षेत्र—दक्षिणभारते विद्यमानं मधुरानामकं क्षेत्रम् तत्र शिवालये विराजमान ईश्वरः सुन्दरमूर्तिनामकः तत्क्षेत्रस्थः पुण्यतीर्थं सुवर्णपद्मिनीनामकः ।

×नेत्रानन्दकृत्-नेत्रयोः आनन्दकृत् ! पक्षे नेतुः आनन्दकृत् इत्यर्थः ।

अतिश्लाघ्यपदोपेता पुरुषोत्तममाश्रिता ।
सुवर्णभूषिता चाऽसौ सद्गवीव विराजते ॥
शङ्खोऽस्या गलसदृशश्शम्पाऽमुष्याश्शरीरसमा ।
यदि वीक्षितं मनोज्ञं वदनममुष्याः किमब्जेन ॥
पङ्केरुहं न पद्मं पद्ममसुष्याश्चरणमेव ।
चन्द्रोऽमुष्या वक्त्रं चन्द्रं रात्रीश्वरं वदन्त्यज्ञाः ॥
यथाऽमरेशस्य पुलोमजाता यथा मुकुन्दस्य च लोकमाता ।
यथा प्रसूनायुधहन्तुरार्या यथाऽस्य चासावनुरूपभार्या ॥
प्रशंसन्तस्तथा त्वेवं भृशं सन्तः पुरे जनाः ।
विलोकयांबभूवुस्तां पुलोमतनयोपमाम् ॥
मुकुरघटितभित्तिगेहं नृपस्स कुलिशधरनीलरत्नादिभाक् ।
स्वमुरुरुचि निनाय गौरीसमां प्रमुदितवदनामिमां सुप्रभाम् ॥
गुणवन्तं निजतनयं प्रणमन्तं प्रपदयोः स्वयोरेषः ।
अलकानगरीनाथो नलकूबरमिव विशांपतिरवादीत् ॥
धर्माङ्गदैषा संजज्ञे कञ्जजातस्य मानसात् ।
मानसात्सरसश्शुद्धादम्भोजपटली यथा ॥
धातृजाऽऽसीन्मया भर्तृमत्यात्मजा,
सौतृषो मे खानि देवताभावतः ।
ज्ञातृषु श्रेष्ठनीतेर्नमैनां वरां,
मातृदेवो भवेति श्रुतिर्वक्ति हि ॥

एवमुदीरितो रुक्माङ्गदेन धर्माङ्गदस्तावदेषां मम सविध्यास्सपत्नी बभूवेति क्रोधादिव वेधसः कुमार्याः पादपीडनमकरोत् । ततोऽसौ गुणैर्मनोजवसो रौक्माङ्गदिः लब्धशिवततिगुणावलिं सन्ध्यावलिमभाषीत् अम्ब ! त्वमम्बुरुहसंभवकुमारीमेनां मम तातपादस्य परितोषहेतोरजस्रं श्वश्रूमिव शुश्रूषयेति ।

सुतवचस्तदवकर्ण्य सा सुतं शतधृतेः परिचचार सद्गुणा ।
सुखितहृच्च सततं प्रियंवदा निखिलवस्तु ददती तदीप्सितम् ॥

नृपस्स्वसौधं नीत्वा तां न परं मानसे निजे ।
आमोदमगमद्धोक्तुकामोऽमूं स वपुष्यपि ॥

मणिस्तम्भेषु संक्रान्तैः प्रतिबिम्बैस्समावृताम् ।
भावेन विदामास ह्येष भूपो विधेस्सुताम् ॥

राजा सुखभाजां प्रथमोऽजात्मभवां,
तां भूषाभिरशेषाभिरदोषां परिभूष्य ।
रेमे बहुकामेन स वामेक्षणयाऽसौ,
कन्यालयशच्या भृशशुच्या बलहेव ॥

हिरण्यगर्भपुत्री सा रत्नगर्भेश्वरं पतिम् ।
प्राप्याऽपि मुक्तभरणा भवतिस्म विधेर्बलात् ॥

चिरं भुक्तवतस्तस्य महिषीं स्वामनुत्तमाम् ।
अजात्मजाया भोगोऽपि नरेन्द्रस्योचितः खलु ॥

समुद्रकाञ्चीरमणेन तेन समुद्यता रन्तुमसौ स्वभाग्यात् ।
साजात्मजाता शमनावमन्त्रा राजावतंसेन समं हि रेमे ॥

चित्रमेतद्यदबला कृशाङ्गी सा स्ववक्षसा ।
भूभृतं चारुकटकं चन्दनाढ्यमदीधरत् ॥

वात्स्यायनविधानतस्सम्भ्रमं रम्यमाणयो रम्यमूर्त्योरम्भयोस्तयो र्हायनेष्वनेकेषु यातेषु स तु विशांपतिर्दशम्यां कस्यांचिदात्मीयभटपटलताडितपटहनिवहढमढमध्वनिमाकर्ण्य, हिरण्यगर्भस्यात्मजावक्षोजकुम्भाग्रलग्नं निजहृदयं ससंभ्रमं समाकृष्य मनुष्यधर्मशय्याकल्पातल्पादुत्पमतिरुत्थाय सुप्तोत्थितामित्थन्तां यथापुरमचकथत् । अयि ! चतुर्वक्त्रपुत्रि ! श्वः पक्षीश्वरवाहनवासरो भविष्यति त्वं स्नातानुलिप्ता सती हविष्यमनुष्मिन् दिवसेऽभ्यवहृत्य मया सार्धं दुग्धवार्धिधामानमाराधयेति ।

क्षोणीनाथस्य तां वाणीमेणीदृष्टिर्निशम्य सा ।
यमसाहाय्यमिच्छन्ती तमसावगदीत्तदा ।

भो वसुन्धराऽधिनाथः ! मन्दरधराधरे पूर्वं पार्वतीरतिसन्निधाने भवता विहितस्य समयस्य समयस्संप्रति समागतः । मह्यं कञ्चन वितर वरम् ।

निशम्य वाक्यं द्रुहिणात्मजाया भृशं स्मरार्तस्स इमां जगाद ।
पद्माक्ष्यभीष्टं वद तावकीनं प्राणान्मदीयानपि ते प्रदास्ये ॥

इत्याख्याता पत्या सा रत्या समा नारीमुख्या विख्यातकीर्तिं तमिदमाचख्यौ ।

सर्वंसहेश्वर चिरात्कुर्वन्त्या भवता रतिम् ।
सुमनोज्ञ ! वृषस्यन्त्या मम तृप्तिर्न जायते ॥
जहिहि जहीहि जहाह्यर्प्याहिपतितल्पदिवसोपवासमपि ।
जागरणं निशि तस्यान्तत्पूर्वोत्तरदिनोक्तनियमांश्च ॥
अहो हरिदिने भुंक्ष्व पञ्चकृत्वो महीपते ।
रात्रिकालस्य भुंक्ष्व त्वं पञ्चवारञ्च षड्रसैः ॥
उद्गन्धिभिर्मलयजैरभिलिप्तमूर्तिं,
संभूषितस्सुमवरैश्च सुगन्धिभिस्त्वम् ।
ताम्बूलचर्वणकरो दिवसे मुरारे,
साकं मया नृप ! रमस्व वरो ममैषः ॥

वरमिमं मह्यं न दास्यसि चेत् त्वमनृतवादी भूत्वा यास्यसि नरकान्नानाविधान् ।

तद्दुष्टवाक्याद्विभयाञ्चकार नृपस्तदा मोहमयाञ्चकार ।
ततो धरण्यां पतयाञ्चकार चिराय बुद्धिं बिभराञ्चकार ॥
इदं चित्रं विधिसुता पन्नगीक्रूरवाग्विषैः ।
नरेन्द्रं मन्त्रदत्तं यत्पीडयामास निर्भरम् ।

तदानीमवनीपतिमतिदुःखितं धैर्यं न प्रतिभातिस्म किञ्चित् ।

चिरेण चिन्तयित्वाऽथो नरेशो धीमतां वरः
तां त्वयं मृदुभिर्वाक्यैस्सान्त्वयामास मोहिनीम् ॥

अये ! सरसीरुहासनतनये ! निर्मलचरिते ! धर्मप्रत्यूहं मास्म करोः, प्रसादं मम विधत्स्व, मधुसूदनदिने नैव भोक्ष्यामि कुवलयनिभाक्षमहम् ।

मोक्षकाम्यनृतं त्वेतच्छ्रीचक्रनायकप्रियम् ।
अनुतिष्ठाम्यहं सम्यक् तनुजे ! परमेष्ठिनः ।
अयि रम्भोरुचिरस्य व्रतोत्तमस्य चरणे भृशं रुचिरस्य ।
अस्ति मम तु चतुरास्यप्रभवे त्वं कुरु न हानिमतिचतुरास्य ॥
भक्ताय धारयति किल मुक्तिर्नारायणो विधितनूजे ।
मुनिसमुदायस्तस्मादनिशं हृदि मुक्तये हरिं भजति ॥
हरिदिवसे विधितनये परिरभतेऽश्नाति खादति नरो यः ।
स्त्रियमन्नं ताम्बूलं यमस्य पुरे शुचं भजति बह्वीम् ।
एकादशीव्रतमृते भवपाशबद्धा अन्यैरशेषसुकृतैर्न भजन्ति मुक्तिम् ।
यत्यं गतास्सुमहदौषधमन्तरेण किन्निर्गदा लघुकषायमुखैर्भवन्ति ।
एकादशीव्रतमलं सुलभं विसृज्य,
कुर्वन्ति ते विधिसुते श्रमसाध्यधर्मान् ।
त्यक्त्वा शुभं स्वपुरतः परिवेषितान्नं,
भिक्षामटन्त इव मूढतरा नरास्ते

सर्वञ्च धर्मनिचयं रचयन्नपीड्य-
मेकादशीव्रतविहीननरो न भाति ।
हाराङ्गदादिनिखिलाभरणैर्युतोऽपि
लोको यथा सुहसने वसनेन हीनः ॥

अग्निष्टोमो वाजपेयातिरात्रावप्तोर्यामः पौण्डरीकोऽप्यथोक्थ्यः ।
यागा अन्येऽप्यश्वमेधप्रमुख्या एकादश्या नो समा श्रीसमाने ॥

तस्मान्मधुसूदनदिनभोजनं विना यद्यदन्यदभिलष्यसि तत्सम-स्तमपि तुभ्यमर्पयिष्यामि । कामिनि ! तव स्वामिनि ! मयि कुरु करुणाम् ।

अनुनीतैवं बहुधा मनुजेश्वरकुञ्जरेण सा कुपिता ।
दशरथमिव कैकेयी भृशमभ्यर्थ्य यत्कठोरवचनैस्तम् ।

मह्यं वरं प्रतिश्रुत्य नह्यद्य त्वं प्रयच्छसि
तृणाय मन्ये रे ! त्वाऽहं नृणामधिपते ! ततः ॥
किं प्रमाद्यसि धर्मात् त्वं सुप्रत्यर्ककुलोद्भवः ।
उत्पथे न पथे गच्छ स्वःपथं तत एष्यसि ॥

इक्ष्वाकुकुलस्य विमलस्य कलङ्कं मा त्वं कृथाः श्रीनिवास-वासरे त्वमरे विरचय प्रत्यवसानं अपरं किञ्चिदपि न वाञ्छामि ।

वायुरावाति सत्येन सत्येन भ्राजते रविः ।
'सत्यंवद' त्यरे वेदः क्षित्यधीश्वर गर्जति ॥

सत्यं परं सर्वनृपोत्तमेषु सत्येन सन्तो न दिवश्च्यवन्ते ।
सत्ये रमन्ते मुनयोऽखिलाश्च मा मुञ्च सत्यं मनुजाधिनाथ ॥
सत्यं रक्षन् सुगुणनिलयो धुन्धुमारो * महात्मा,
चक्रे काश्यां स्वसुतवनिताविक्रयं चक्रवर्ती ।
कौसल्येशस्तनयमनयत्काननं रामचन्द्रं,
श्येनायादाच्छिबिरपि पुरा स्वीयकायस्य मांसम् ॥

इत्युदीरितस्तया क्षित्यधिपोऽयमत्यन्तं तस्यै बाक्रोपमचक्षु-कोप क्रुद्धस्य तस्य क्षितीशस्य चक्षुर्द्वयमपि चिरादन्तर्देहे स्थितेन तदा धरित्रीशेन परित्यक्तेन निजगृहाद्बहिर्जिगमिषया नयनपथं प्राप्तेन मोहिनीविषयरागेणेव लोहितमभवत् ।

वेपमानसमस्ताङ्गो भूपतिः कोपसंयुतः ।
कृष्णभक्तस्स तामूचे कृष्णसर्प इव श्वसन् ॥
नीतिहीने महादुष्टे पातिव्रत्यं कथं त्यजेः ।
व्रतं हंसि किमर्थं मे श्रितं सर्वमुनीश्वरैः ॥
घनपातकयुक्तां त्वां जनयामास यः पुरा ।
निन्दनीयस्स एवाऽलं मन्दबुद्धिश्चतुर्मुखः ॥

अयि कुमते पण्डितमानिनि किमर्थं मह्यं द्रुह्यसि अहमनृत-

* धुन्धुमारः हरिश्चन्द्रः

वादी भूत्वा दुर्गतीर्बह्वीरप्यनुभविष्यामि, कष्टतरनिकृष्टयोनिष्वप्युत्पत्स्य-
ध्यामि, केषवदिवसे जन्मिन न यावद्विदधामि एवं प्रत्याख्याता पत्या
सा पैतामही पतिता नितरां क्रूरा समभिक्रुध्यतिस्म पुवन्तमथचापतिं
चक्रितस्म ।

त्यक्त्वा दुर्मेधसं त्वाहं धर्मेण परिवर्जितम् ।
लोकाय याम्यरे भ्रातुश्शोकारण्यकृशानवे ॥

एवं व्याहृत्य सत्यलोकं प्रति प्रयातुकामा बभूव पद्मभूदुहिता
तदानीमुत्तानपादसन्ततिरिव सुनीत्या सुरुच्याऽपि युक्ता, मद्रामंवस
तिरिव सुशीलान्विता, कालुगुडीनगरीव × प्रवृद्धश्रीमत्युपेता सन्त
पदसुश्रूषानिरता, सन्ध्यावली मोहिनीमेना मञ्जुनयामीक्षि
चिन्तयाञ्चकार ।

× कालुगुडीनगरी दक्षिणभारते त्रिचिनापल्लीजिल्लान्तर्गता
काचनपुरी ग्रन्थकर्तुरस्य जन्मभूमिर्वासभूमिश्च इयमेव । अत्रस्थे शिवा-
लये प्रवृद्धश्रीमत्याह्वया अम्बिका विराजतेतराम् । इयं ग्रन्थकर्तुः कुल-
देवता च भवति । अत एव स्वस्य पुत्रीष्वन्यतमां, मम मातामहीं
वृद्धश्रीमत्याह्वया अकरोत् ।

सप्तमो विलासः



अथ तामिमां सरसिजासनात्मजां,
प्रथमा नृपस्य गृहिणी महामतिः ।
व्यथयागमय्य सदनं निजं सती,
कथयांबभूव खलु मञ्जुभाषिणी ॥

अयि नलिनासनतनये ! वनितानां पतिरेव दैवतं भर्तृविप्रियं
माकार्षीस्त्वम् । योषिता पतिं निजमवमनुते सा तु विविधानिरयान-
नुभूय काष्ठीला भवति । अत्र विचित्रं पुरावृत्तमिदानीमुदाहरिष्यामि ।
समाहितमानसा समाकर्णय । मयि कौमारावस्थायां तातमध्यमवासी-
नायां मध्याह्नसमये पारश्वधिकः कश्चिन्मम पित्रादेशेन स्थविष्ठं काष्ठं
द्वादशनिर्भाग ! पाटयामास । काष्ठन्तमन्तरेण चिरेण काकादेकान्त-
मभियातेर्भिया विलीनेव स्थिता काष्ठीला काचिदितः परं परभृतश्चिरं
भीतानामेतावदेतस्य स्फीतपातकजातजातस्य हेयस्य कायस्य पोष-
णतः किं तोषणमुत्पत्स्यति, तस्मान्मद्विग्रहमहमिदानीं प्रदाय वाय-
साय सौन्दर्यस्याऽऽस्पदं सौख्याधिक्यप्रदं, बहुदीप्तिभरं भवभीतिहरं,
स्तुतवतां प्रवरं भुवनेषु परं, शिष्टजनवासितं विष्टपं हृष्टमना द्रष्टुं
विष्णोस्तृष्णापेतेव तस्मात्काष्ठान्निर्गता क्षितावपतीत् । तदानीं तदा-

हारकोक्षः कश्चित् ध्वाङ्क्षस्सुग्रीवसेनाभिधानीब्मुखसहितां दशग्रीवसेनामि· वाऽर्जुनविग्रहं प्राप्तां जवात्तां जग्राह तत्क्षणे कण्ठकरुणया मया काष्ठी· कापरिपालनार्थं कोष्ठे न निवारितश्चिरंजीवी स तु तां विजहौ तर्हि मया तावत् पृषत्कसंहतिरिव उर्वी गता कृतापराधजनतेव बलिभुजा पीडिता सा सीतलतरैः पाथोभिः प्रोक्षिता सद्यः पूर्वं ज्ञानमासाद्य हृद्यया मानुष्यगिरा मामुदीरयामास ।

धन्ये कौण्डिन्याख्यपुर्यान्तु पूर्वं कन्येष्टाऽहं कस्यचिद्भूसुरस्य ।
भीजखोभालालिताऽलं पितृभ्यां राजद्भूषा शालिनी नीलकेशी ॥

मम पितरौ स्वच्छधियौ हृष्टधुयस्व्छायकायाय कस्मैचिन्मां प्रायच्छताम् । स तावन्मम भर्ता पापेऽभिनिवेशं प्राप्य देवानां प्रियो गणिकया कया चित्साकं रतिं कुर्वन् सर्वस्वमपि तया दास्या संयच्छ· तेस्म कामुकः । भूयोऽपि तत्प्रीत्यर्थमनुनाथितवान्मां तावकमस्तोक· मेकं भूषणं दोषे वितरेति ।

कलापौघैर्मयूरीवोज्ज्वलापि बहुभिश्शुभैः ।
अहं न दत्वा तत्तस्मै गृहं पितुरगां तदा ॥
मत्वा कामं विविधकलापैर्भर्तारं तं द्रविणविहीनम् ।
क्षुत्तृष्णार्तं सशुचमलं नो मत्तृष्णाहीनमहमरक्षम् ॥
कलुषेण तेन महता खलु कुच्यामयमुपेत्य निधनमपि ।
निरयाञ्छतशो घोरांश्चिरमनुभूयाऽभवं च काष्ठोला ॥

तस्मान्मामस्मात्किल्बिषमपनोदकार्थं श्रीमत्या भवत्या ब्रह्महत्या-दिमहापापविनिर्मापनमासे वलक्षे पक्षे पक्षीश्वरकेतुदिवसे वराहरूप-हरिसपर्यापुरस्सरं यदुपोषणं विहितं सुकृतस्य तस्य षोडशांशं विश्रा· णतिकुक्षिवनि त्वमनुकम्पया मह्यमर्पयाऽधुनेति मां प्रार्थयामासतराम् । अहमपि महत्तत्पुण्यं तस्यै तत्प्रायच्छम् साऽपि सद्यः प्राकृतं दुष्कृत नीचनीचं तच्छरीरकं युगपद्विहाय वृन्दारकदेशिकमन्दिरमिव सुन्दरसु· मकचसंयुक्तं, मधुरापुरमिव रोहिणीपतिविराजितं, विश्वनाथमिव वि· शालाक्ष्युपेतं, वल्मीकभवमिव सुग्रीवालंकृतं, मारीचमिव सुबाहुसंयु· क्तं, प्रावृट्कालमिव पृथुतरपयोधरसहितं, कालकण्ठकायमिव कान्तका· लिकायुक्तं, एतत्पुरमिव वरनाभिमण्डलमहितं वसिष्ठमिव वरिष्ठकलत्र-युक्तं दिव्यविग्रहं गृहीत्वा वैनतेयकेतुदूतैरानीतं कमनीयं व्योमयानमा-धिरुह्य अमरधामलोकं प्राविशत् । तस्मात्त्वं भर्तृविप्रियं मा कुरुष्वेति भाषमाणां दोषहीनां कन्यामपि तां नलिनाऽऽसनदुहिता सा भूयो-ऽप्येवमाचचक्षे !

तार्क्ष्यध्वजस्य दिवसे भोक्ष्यति न यदि क्षितीश्वरस्साध्वि !
छिन्दन्तां खड्गेन शिरश्चिन्ताहीनस्सुतस्य विगतासुः ॥
घोरमेतद्वचश्श्रुत्वा पारमेष्ठ्युदीरितम् ॥
शिशानुग्या चकम्पे सा प्रवाते कदलं यथा ॥

ततस्सा धर्माधर्मविनिमयविचक्षणा क्षणादेव धृतिमवलम्ब्य म-म कुमारसंहारं कारयिष्यामि सारसयोनितनूजे ! राजेन्द्र गोत्वमभिधाय त-या साकं रुक्मांगदमासाद्य तस्या अभिप्रायं तस्मै निवेदयामास ।

धात्रात्मजातोमतरं त्वभीष्टं
गोत्राप आकर्ण्य स लब्धमूर्च्छः ।
द्रागिन्द्रतुल्यो धरणौ पपात
प्रागिन्द्रवज्राऽभिहतो यथाऽद्रिः ॥

तदनु मनुजाऽधिपोऽसौ मुहूर्तादुपात्तचेतनश्चतु - रुपायचतुरश्चतु-राननतनयामनुनयति स्म । अयि ! कञ्जभवतनूजेऽहमञ्जलिं कलयामि तुभ्यमभ्यवहारं नीरजलोचनदिने न विधास्यामि । सौन्दर्यनिर्जितमारं कुमारमद्यास्माकीनं नैव हनिष्यामि, वितरिष्यामि तुभ्यमितरत्समस्त-मपि मम प्रसादं विरचय शतपत्रमुखि ! पुत्रभिक्षां मोहिनि ! देहि मे ।

इत्थं कथयतस्तस्य भारती निखिला च सा
तच्छ्रः पथमासाद्य बभूव वनचन्द्रिका ॥

क्षेमंकराणि क्षितिनायकस्य
वाक्यानि सर्वाण्यपि मोहिनी सा ।
यन्नाऽग्रहीत् तत्खलु युक्तमस्या —
स्संप्राप्तवत्या अजपुत्रिकात्वम् ॥

अनेहसि तस्मिन् कैलासशिलोच्चय इव सोमसुखशोभितः, योगी

व विशालदृष्टियुक्तः, कुमुदबन्धुरिव रुचिरतरकरपरिष्कृतः, षाण्मातुर इव महाशक्तियुक्तः, आनकदुन्दुभिनन्दन इव यशोदया मदिहतविग्रहः, कुसुम शिलीमुख इव माधवप्रियः मिथिलानिलयजन इव जनकसन्देशकरः, मित्रकुलवर्धनोऽप्यमित्रकुलवर्धनः, मर्त्यसह्यतवीर्योऽप्यमर्त्यसह्यतवीर्य धर्मांगदो धर्मांगदो रुक्मांगदमभिवाद्य तस्य पुरतः खड्गं निशितं निक्षिप्य 'भो जनक ! भोजनकरो मा भव माधववासरे निशितेनाऽमुना निश्शंकमसिनिमित्तमुत्तमाङ्गं विकृत्य सत्यवादी भवे' त्युदीर्य ग्रीवां स्वीयममनमयत । तदानीं रुक्मिणीरमण इव नरकनाशनः, भारत इव बहुश्लोकयुक्तः, गीर्वाणगण इव विष्णुपदैकगतिः, क्षितिपतिरयमपि तस्य गिरमुरीचकार ।

विशांपतिस्सोऽथ महानुभाव —
शशाङ्कवक्त्रं तनयं जिघांसुः ।
हस्ते ययौ खड्गमतीव तिग्मं
चित्ते च विष्णोश्चरणाब्जयुग्मम् ॥

तस्मिन्महीपालव्याघ्रे शीघ्रेण कुमारप्रभाधरय निजकुमारस्य कण्ठं द्विधा कर्तयितुं करालं करवालमुद्धृतवति सति —

कासारमुख्य इव सत्कमलोपशोभी
कैलासशैल इव निर्मलहारयुक्त

आरुह्य तार्क्ष्यममरैर्विनुतापदानो
मा मेति भूपतिकरं भगवानगृह्णात् ॥
सितकरनिभवक्त्रं सिन्धुकन्याकलत्रं
विकचकमलनेत्रं वारिदश्यामगात्रम् ।
भवजलनिधिनावं तन्नमस्कृत्य देवं
दिनमणिकुलदीपस्तोष्टवीति स्म भूपः ॥
सकलजनमदगारं श्रीमुखेन्दोश्चकोरं
दुरितघनसमीरं देववक्त्राब्जसूरम् ।
कृतशुभतरहारं दैत्यसंघातघोरं,
निखिलनिगमसारं नौम्यहं त्वामुदारम् ॥
भक्तानुकूलं परिशुद्धशीलं
शम्पाऽऽभचेलं स्तनयित्नुनीलम्
त्रैलोक्यपालं सुगुणालवालं
त्वां पुण्यलीलं शरणं भजेऽहम् ॥
सुरेष्टपरिपूरणं दितिजमण्डलीमारणं
सुगुप्तवरवारणं विपुलनक्रसन्दारणम् ।
महीध्रवरधारणं भवसमुद्रसन्तारणं
भवन्तमघवारणं हृदि भजे जगत्कारणम् ॥

पत्राधिरूढसुमनोभिरावृत—
स्सुस्कन्धभृत्साधुफलप्रदायकः ।
त्वमिन्द्रशाखीव विभासि भो विभो!
सनातनस्त्वं स तु नश्वराकृतिः ॥
तापहृता हरिणभृता तमोऽपहृता शिवेन सोमेन ।
शंखं तेऽथ सवर्णं सुमनः पूज्यं मुहुर्वन्दे ॥
हृत्सारसस्थभक्तानां सत्सारं साधुनन्दकम् ।
मन्देतरसुखाऽवाप्त्यै वन्दे तव सुदर्शनम् ॥
अम्लानां त्वत्प्रियां साध्वीं त्वद्वक्षः स्थलशोभिनीम् ।
वनमालामहं वन्दे तनयामपि वारिधेः ॥
बहूनि भूतानि वशीकरीषि
कृतानि लक्ष्मीश! वरीभरीषि ।
एतानि सर्वाणि परीहरीषि
त्वं हि भिन्नं विजरीहरीषि ॥
श्रीनाथ! ये भुवि भजन्ति गतामयास्त्वां
नानाविभूषणधरा वरमन्दिरस्थाः ।
तान्नातनोषि समदांस्तुलसीकलापा—
न्दीनाम्बुराशिवसतीस्तव किञ्चिदत्र ॥

अम्भोजाक्ष हिरण्यहृन्निजपदा संस्पृष्टनिश्शेषगु—
नीलाश्चान्तःकरणश्च कुब्ज्य+भिरतश्चोच्छुभुजङ्ग*प्रियः ।
आरूढद्विजराजपृष्ठकधको मातंग×संरक्ष्यपि
त्वं हा हन्त करोषि जन्ममृतिभिर्मुक्तान् स्वभक्तान् जनान् ॥

त्वं साधुमुक्ताखिलदन्तमण्डलो
दोषाकरास्यश्च सदा गदान्वितः ।
सर्वामराणां स्थविर स्तथाप्यहो
त्वामब्धिजा कामयतेतरां प्रभो ।
गोसद्विपुत्र वरगो सरसीरुहाक्ष
गोलूनमध्वमृतगर्वक गोरमेश ।

* नीला विष्णुपत्नी+कुब्जी भूमिः * भुजङ्ग आदिशेषः, विटश्च। मातंगः गजेन्द्रः, चण्डालश्च ।

* गोसद्विपुत्र इन्द्रियशत्रुघ्न, वरगो श्रेष्ठवाग्मिन्, गोलूनमध्व-मृतगर्वकः यया वाचा लूनः छिन्नः मधोः अमृतस्य च गर्वः स्वादिम-गर्वः यस्य महाविष्णोः सः, तस्य संबुद्धिः गोलूनमध्वमृतगर्वक गर्वः यस्य महाविष्णोः सः ... लूव गर्वकः स्वार्थे कप्रत्ययः गोरमेश भूम्याः लक्ष्म्याश्च नायक गोम-ण्डलप्रथितवेदमण्डले प्रसिद्धभूमण्डले प्रसिद्धेति वा गोसुखदायिमूर्ते-भूम्यै सुखप्रदकृष्णमूर्ते गोविन्द धेनुपालक गोपति मध्यवासिन् ! सूर्यग्रहणमध्यवर्तिन् !

गोमण्डलप्रथित गोसुखदायिमूर्ते
गोविन्द मां सुखय गोपतिमध्यवासिन् * ॥

एवमर्णवकाञ्चीपतिना वर्णितस्सुपर्णध्वजो भगवान् "ऋतध्व-जकुमार ! तव भक्त्याऽहमत्यन्तं मुदितोऽस्मीत्युदीर्य सन्ध्यावलीरुक्मां-गदधर्माङ्गदेभ्यो निजसारूप्यं समर्प्य तैस्साकं स्वकीयं लोकमगमत् ।

द्यावापृथिव्योर्धरणीशमेनं
देवा मनुष्याश्च भृशं शशंसुः ।
अनर्घ्यरत्नाभरणैरुपेतं
ननर्त सम्यक्सुरयौवतञ्च ॥
मार्दङ्गिकास्तुपर्वाणो मृदङ्गान्समवादयन् ।
कलावतीमहत्याख्ये वीणे तुम्बुरुनारदौ ॥
अंधारि वंभारि हस्तसुतहस्तौ कृशानुश्च ।
विश्वावसुरप्यपरे गन्धर्वाश्चक्रिरे किलोद्गीतिम् ।
माणिक्यभूषणयुतं गाणिक्यं सुमनसाञ्च तदा
विधुसमसुखमुपगीति मधुरस्वरसंयुतं चक्रे ॥

* पूर्वार्धे मारुती देवसंबन्धिनी परा उत्कृष्टा भूतिः ऐश्वर्यम् उत्त-रार्धे मारुती वायुसंबन्धिनी वायुकृतेति यावत् पराभूतिः परिभवः ।

यदा त्वे रुक्मांगदस्य पुरोहितो रोहिताश्वतेजास्तपोधनकुञ्जरः कश्चन सत्संहायमानन्दरतांश्च प्राणायामपरो भूत्वा सतं तस्यमाश्च सलिलाभिर्जटस्य सत्यलोकनायकदुर्हितुर्विहितं निजनिष्पनिधनं अनुपुत्रा-द्वाकर्ण्य परमकोपमवाप ।

कुपितस्य मुनीन्द्रस्य तस्य द्वे चक्षुषी अपि ।
चिरान्निद्रापरित्यागादिव रक्ते बभूवतुः ॥
अन्तर्देहे चिराद्रुद्धं पवमानं तपोधनः ।
यौगपद्याद्बहिर्मुञ्चन्निव विश्वसिति स्म सः ॥

तापसपुंगवस्य तस्यांगानि सुचिरचिरसलिलवासत्वादत्यन्त-शैत्यबाधितानीव तदानीं प्रास्फुरन् । स तावदप्रमेयप्रभावो विजितवद्-भिप्रमेव मोहिनीमुपसृत्य 'दुर्मते मोहिनि पतिद्रोहं कृतवती भव-तीमधुनाऽहं भस्मीकरोमी" त्युदीर्य पाणिना तोयमादाय कावे-लया मुमोच ।

महता मुनिना मुक्तं दहति स्म हि तत्पयः ।
तीक्ष्णकेश्यास्तदा देहं तूलराशिमिवानलः ॥

स्वाभितानां जनानां यन्मरणाभावकारणम् ।
चित्रं चित्रं तदेवाऽहो अमृतं तामभारयत् ॥
उचितैव विषाभिरूया सलिलानां न संशयः ।
यतानि मुनिमुक्तानि दहति स्म विधेस्सुताम् ॥
शातोदरी तं प्रविहाय कायं
यातोरुसंपद्द्रुतमिन्द्रलोकम् ।
दूतो निलिम्पाधिपतेर्हि तत्र
यातो निरुद्ध्याऽवददेव सेनाम् ॥
चण्डे ! भर्तृघ्नि प्रचण्डाखण्डे !
रण्डे ! चण्डालीव भूदेवगेहम् ।
सौरेशानं विष्टपं नार्हसि त्वं
सौरेर्लोकं शोकदं याहि चिक्त्वाम्
इति निर्भर्त्स्य भगवानतिकोपवशीकृतः ।
अजपुत्रीं स दण्डेन प्रजहार समीरणः ॥
निगमैर्भिः पुराऽनुष्ठितां क्रियां
जगति कुर्वते बुद्धिशालिनः ।
मुनिकृतं यतो मोहिनीतना
वनिल आततोत्काण्डपातनम् ।
या मारुती परा भूतिर्मोहिन्या वाञ्छिता हृदि ।

सा मारुती पराभूतिस्सम्प्राप्ता तरसा तया ×
मैरावणस्य सेनेव मारुतेन प्रपीडिता ।
सा शातक्रतवाल्लोकान्निर्गता दुर्गता भृशम् ॥

तद्नन्तरमन्तकलोकरसातलादीनि सकलानि विष्टपानि प्रविष्टा सा तत्र तत्र स्थितैः जनैः "दुष्कृतकारिणि ! तुच्छे ! गच्छ गच्छेति धिक्कृता कशादिभिः ताडिता च क्लेशयासनतनया भृशं क्रोधयुक्ता कोपति स्म । तदानीमम्बुजासनजम्भशासनसंयमिनीपतिप्रभृतयो गीर्वाणास्स्वेऽपि कारुणिकास्तस्याः समीपमुपजग्मुः । साऽपि सुमनस्त्वात् समवेतं सविनयमेवं व्यजिज्ञपत् ॥

हे तात ! हे शमन हे त्रिदिवालयौघ !
युष्मत्कृते ह्यकरवं पतिपुत्रनाशम् ।
मत्पातकप्रशमनाय महानुभावाः !
कञ्चिद्वरं ददतु मे कृपया भवन्तः ॥

इत्थं तया कथितां गिरमङ्गीकुर्वत्सु सत्सु सर्वेसुपर्वसु च सा पुनस्तानेवमब्रवीत् ।

लक्ष्मीजानेरहनि शुभदे साधु कृत्वोपवासं
गायं गायं निशि मधुरिपुं सम्यगुत्सृज्य निद्राम् ।

---

* पूर्वार्धे, मारुती देवसम्बन्धिनी परा उत्कृष्टा भूतिः ऐश्वर्यम् उत्तरार्धे मारुती वायुसंबन्धिनी वायुकृतेति यावत् पराभूतिः परिभवः ।

द्वादश्यां स्युश्श्रमयुततया ये दिवास्वापभाजः
स्तेषां पुण्यं निखिलमपि तद्दे वतास्सेवतां माम् ॥

इत्युक्ता जलरुहसंभवस्य पुत्र्या
भाषन्ते झटिति तथास्त्विति स्म देवाः ।
तादृशं वरमतुलं सुरेश्वरेभ्यो
लब्ध्वा साऽप्यभवदलं प्रहर्षिणीयम् ॥

रामस्वामिकवीश्वरेण रचितं चारुप्रबन्धं शुभं
सत्सन्ध्याञ्जलिसंयुतं सुललितं कल्याणवृत्तान्वितम् ।
सालङ्कारमृतध्वजात्मजसमं श्लाघ्यैश्च वाक्यैर्युतं
पापठ्यन्त इमं तु ये नरवरास्ते यान्ति सौख्यं परम् ।

ध्रुवादिभक्तमण्डलाय भूरिभूतिदायिनं
समीक्ष्य यं त्रपां भजन्ति पञ्चचामरद्रुमाः ।
विरागयोगिपूगसेव्यनागभोगतल्पको
रमापतिर्ममातनोतु सन्ततं स मङ्गलम् ॥

श्रीरामस्वामिशास्त्रिप्रवरविरचिता सत्प्रसादाऽतिशान्ता
चम्पूरानन्ददायिन्यतिललितपदन्यासविक्रान्तलोका ।
सद्वृत्ता साधुरीतिस्फुरदतुलरसालङ्कृतिः श्रीसनाथा
जीयाद्रुक्माङ्गदाख्या तनुरिव कमलावल्लभस्याऽतिहृद्या ॥

सेनानापितचरित्रम्



सेनानापितनामा श्रीनाथे भक्तिमानभूत् कश्चित्।
म्लेच्छपतिवपनकारी, सोऽच्छमतिर्बहुगुणैश्शुभैर्युक्तः ॥
स कदाचिद्धरणीशो निकटे स्थितमादिदेश भटमेकम्।
वपनं मेऽद्य विधातुं, सपदि क्षुरिणं समानयत्वमिति ॥
अथ स क्षुरिगृहान्वर्यं भटवरः प्रविश्याब्रवी—
श्रीमारमणमर्चतोऽस्य निकटे नृपोक्तिं तदा।
निशम्य भटभाषितं स मतिमांस्तमित्यब्रवीत्
समाप्य हरिपूजनं नृपतिमागमिष्याम्यहम् ॥
नापितभाषितमेष समस्तं भूपसमीपमवाप्य जगाद।
पापयुतस्स शरारुघातुकः कोपयुतस्तत्र भटानिदमूचे ॥

(शरारुः घातुकः 'शरारुर्घातुको हिंस्रः' इत्यमरः)

दूता भवन्तो गृहमेत्य तस्य वेतादृशं तं द्रुतमानयन्तु।
ज्ञातापराधस्स तु नागतश्चेद्धीनासुमेनं विदधात्विदानीम् ॥
इति वदति नृपे तस्मिन्नतिवेगात्प्रस्थिता भटास्तेऽपि।
सेनानापितवेषं दीनार्तिहरो दधौ तदा विष्णुः ॥
रिपुनाशकरः खड्गो वपनायुधतामगात्तदा तस्य।
दामोदरस्य चक्रं रोमोत्पाटनमभूच्छितं शस्त्रम् ॥
अपारशक्त्या युतमस्य शार्ङ्गं कृपाणिरासीद्गरुडध्वजस्य।
अपाचराणां भयदा गदा साप्युपागमत् द्राङ्नखकृन्तनत्वम् ॥
अम्बुधरोपमशब्दः कम्बुवरोऽमुष्य तोयमभूत्।
शीतांशुसूर्यदृष्टेः पीताम्बरमप्यभून्मलिनवस्त्रम् ॥
उत्तरीयं हरेः शस्त्रकोशोऽभवत् तत्तदप्यायुधं तत्र निक्षिप्य सः।
सत्तमाऽमर्त्यसंसेव्यपादो नृपं सत्तमेत्यात्मकाले करं दत्तवान् ॥

महेन्द्रमुख्यवृन्दारकार्चितं लक्ष्मीपतिमखिललोकनाथं, मत्वा स नापितं म्लेच्छराजस्तदा कोपमुत्सृज्य तं कथयति स्म। 'आगतो मत्प्रयाददतिवेगतो भवान्, आतश्च ममस्थानुरूपं, त्वद्दर्शनादहं त्यक्तकोपोऽभवं, हर्षश्च वर्धते हृदि ममाद्य सपदि वपनं कुरुष्व मे पुरस्तात् तुभ्यं प्रदास्याम्यहं प्रभिताधिकं'' इत्यमुक्त्वा तुरुष्कराजस्तत्रासने वपनार्थमुपविवेश।

नृपसन्निधौ तदानीमुपविश्याऽसौ समस्तजगदीशः

गौरवमुत्सृज्याऽस्य चौरं कृतवान्स्वभक्तवात्सल्यात् ॥
निजमृदुहस्तस्पर्शात्सुखाब्धिमग्नं चकार स तुलुष्कम् ।
तत्कर्मणि हि समाप्ते लक्ष्मीपतये ददौ स बहुनिष्कम् ॥
नृपतिशासनात् स्वर्णभाजने सपदि सेवकस्तैलमाहरत् ।
तपनचन्द्रदृग्विष्णुराशिरः प्रपद्मस्य चाऽभ्यङ्गमातनोत्

कीर्तनम् ॥

यदुकुलकांभोधि स ददर्श सददर्श
म्लेच्छपतिर्भगवन्तं विष्णुं स ददर्श स ददर्श ।
तैलपात्रगतमेनं पुष्पायुधशतकोटिसमानं
विष्णुम् । स (ददर्श)
जलधरश्यामलगात्रं पंकेरुहदल अन्निभनेत्रं
विष्णुम् । (स ददर्श)
शंखचक्रादिसमेतं दिव्यपीताम्बरसंवीतं
विष्णुम । (स ददर्श)
कौस्तुभशोभितकंठं राकाचन्द्रमुखं वैकुण्ठं
विष्णुम । (स ददर्श)
नारायणं तं किल पश्यतोऽस्य दूराद्गतौ द्वौ क्षितिपस्य यामौ ।
चारा अथो तस्य विशंङ्कमाना अथ्रात्स्थिता इत्यवदन्नरेन्द्रम् ॥
कालक्षेपः किमर्थं ते तैलाभ्यंगः कृतो नृप ।

बालवत्तैल दक्किंकरत्वं खेलसि स्नानमाचर ॥
एवं विज्ञापितोऽत्यन्तं सेवकैर्बहुभिस्तदा ।
सोऽवनीपतिरुत्तस्थौ देवदर्शनविस्मितः ॥

अनन्तरमनन्तरमणीयगुणगणमणिपूगसागरं अनन्तशायिनमनन्तं दृष्ट्वा समस्तलोकप्रसिद्धं विशुद्धकीर्तिन्तं दिवाकीर्तिवुद्ध्यैव तैरदृष्टं तद्दिव्यरूपमभीक्ष्णं दिदृक्षुस्सन् 'हे सेनानापित ! ममैव सदने सदा त्वं वस तुभ्य बहु निष्कराशि दास्यामो" ति तुलुष्कराजः पुष्कराक्षमभिज्ञाय स्वीयमन्तः पुरं स्नातुं यातिस्म ।

अथ भक्तशोककोशे हरिस्तदखिलं विधाय च सुवर्णम्
वैकुण्ठलोकमागाद्विबुधैर्विनुतोऽधिरुह्य ससुपर्णम् ॥
द्रुतं स कृतमज्जनो नरपतिर्बहिर्द्वारि तं
न वीक्ष्य भृशदुःखितो निजभटं बभाषे तदा ।
त्वमेत्य भट तद्गृहं क्षुरिणमानयस्वेत्ययं
भटोऽपि नृपते गृहादतिजवात्प्रयाति स्म हि ॥
तावदयं हरिसेवकमुख्यो देववरं तु सुपूज्य रमेशम् ।
केवलभीतियुतस्सहशाखो धावति हि स्म नरेन्द्रसमीपम् ॥
तत एष नृपं वदतिस्म नतः कृतवान्वपनं तव को नृपते ।
इति तद्वचनश्रवणान्नृपतिस्त्विवति विस्मयगोऽवददनमिदम् ॥

अयाऽतीव कृत्वा मम क्षौरकर्म श्रिया जुष्टरूपं सुतैले प्रदर्श्य ।
मया दत्तमर्थञ्च वस्त्रेण बध्वा प्रयातः किमद्योन्मदिष्णुस्त्वमागाः ॥
इति नृपवचनं निशम्य धीमान् धनमपितत्स विलोक्य शस्त्रकोशे ।
सुररिपुरकरोन्मदाकृतिस्सन्निखिलमपीत्यवधाय भूपमूचे ॥

श्रीनाथ एव वपनं विदधे तवाद्य
क्ष्मानाथ नाहमिति संवदतो नितान्तम्
वाक्ये हि सांशयिक एव बभूव तस्य
श्लाघ्ये महद्भिरधिकं स तुलुष्कराजः ॥
भूयो भूयः कनकरचिते पात्र आनीय तैलं,
तत्रच्छायां मलिनवसनां नापितस्यैव दृष्ट्वा ।
लोकेशो मे वपनमतनोद्विष्णुरेवेति मत्वा
संपूज्यैनं हरिजनवरं विष्णुभक्तो बभूव ॥
नापितस्य चरितं किल रामस्वामिना कृतमिदं शुभकारि ।
यश्शृणोति मनुजो भुवि भक्त्या विश्रुतं स हरिलोकमुपैति ॥



कण्णप्पचारित्रम्

निश्श्रेयसप्रदानां कश्श्रेष्ठो वद समस्तधर्माणाम् ।
इति पृष्टो मुनिसिंहैरतिहृष्टोऽवददमूनिदं सूतः ॥ १ ॥
मखदानप्रभृतीनां सुखदातॄणामशेषधर्माणाम् ।
शिवधर्म एव मुख्यः प्रवदति वेदस्तमुद्गृहीति किल ॥ २ ॥
अमृतशायिमुखार्चितमादरात्, अमृतदायिनमद्रिसुतापतिम् ।
अमृतपाय्यपि यस्तु न सेवते स मृत एव महीसुरसत्तमाः ॥ ३ ॥
व्याधतुरुष्कमुखा अपि हन्त श्रीधरवाणपदांबुजभक्त्या ।
आधवलन्त्रिविलोचनयुक्तं, साधुतमं हि भजन्ति शरीरम् ॥ ४ ॥
अत्र वक्ष्याम्यहं कञ्चित्सत्रहन्तुर्बहुप्रियम् ।
इतिहासं महापुण्यमतिपातकनाशनम् ॥ ५ ॥
धन्यः सुवर्णमुखरीधुन्यास्तीरे नगोऽस्ति किल कश्चित् ।
वेणुमहीध्राऽभिख्यो वेणुवराऽनिशविमुक्तबहुमुक्तः ॥ ६ ॥
तद्गिर्युपत्यकायां पक्कणबहुशतयुतन्नगरमस्ति ।
गोधपुराऽऽख्यस्तस्मिन् व्याधपतिरभूत्पुरा हि नागाऽऽख्यः
मुक्तातितिवित्तातिकमत्ताऽऽत्मशरीरो
दत्ताऽऽह्वययुक्तां शुभवृत्तां परिणीय ।
रेमे बहुकामेन स वामेक्षणयासौ
कल्यालयशच्या भृशशुच्या बलहेव ॥ ८ ॥

दृत्तानाथोऽनपत्यो धनपतिसदृशः पक्कणान्तालयायै
वल्लीदेव्यै स दत्वा सह विविधपटैर्मौक्तिकप्रस्थकोटिम् ।
लब्ध्वा तस्याः प्रसादात्तनयमतिमतिं धीरनामानमेनं
कृत्वा हर्षं हि लेभे शिशुरपि ववृधे शुक्लपक्षे यथेन्दुः ॥
स धीरश्शास्त्रविद्यासु सुधीरागात्प्रवीणताम् ।
गाढनार्णाह्वयौ तस्य वाढमास्तां प्रियावुभौ ॥ १० ॥
धीरे जातु स खड्गसायकधनुर्धारी निजात्पक्कणात्
गाढाख्यस्स च नार्णनाम शबरोऽप्याखेटकामास्त्रयः ।
प्राप्यामी अटवीम्मृगैर्बहुविधैर्युक्तान्निषादोत्तमाः
पश्यन्तिस्म हि तत्र तत्र नितरां शार्दूलविक्रीडितम् ॥११॥
मत्ता व्याघ्राश्शरवरजालैः कृत्ता व्याधाऽधिपतिनयेन ।
सोऽरण्यानां करिवरकोलान् धीरस्सिंहानपि निजघान॥१२॥
शबरसुतमिमं विलोक्य कश्चिद्वनशरणो हरिणो निकुञ्जमध्यात् ।
बहिरभिभवतिस्म कान्दिशीकस्स च तमनुद्रवतिस्म कापथेन॥१३॥
वेगाद् दृश्यादृश्यमूर्तिस्स धावन्नागाभिख्यस्यात्मजन्तं कुरङ्गः ।
कामं दूरं कर्षतिस्मैष धीरं रामं पूर्वं ताटकेयो यथैव ॥ १४ ॥
तदनु हरिणमुख्ये तद्वनेऽन्तर्हितेऽस्मि—
न्छबरवरकुमारस्सश्रमोंभः पिपासुः ।
इति सुहृदमपृच्छद्वर्तते कुत्र तोयं,
सपदि स च तमेवं प्रत्युवाचैष गाढः ॥ १५ ॥

धीराऽस्मिन्विपिने सुवर्णमुखरीनामाऽस्ति काचिन्नदी
यत्रत्या घृतपिण्डवत्सुमधुरास्सर्वे झषाणां गणाः ।
आखेटाय समागतेन बहुशस्साहष्टपूर्वा मया
गन्तुन्तामियमेकपद्यतिशुभा तां दर्शयिष्यामि ते ॥१६॥
इत्युक्तस्तेन धीरः प्रमुदितहृदयो नार्णसंज्ञं सखायं
त्वन्निष्ठाऽत्रैव हन्तुं विविधमृगगणानित्युदीर्य प्रयातः ।
मध्येमार्गन्निमित्तं बहुशुभदमयं गाढयुक्तः प्रपश्य—
न्नागात श्रीकालहस्तीश्वरनिकटगतान्तान्नदीं स्वच्छतोयाम् ॥
नद्यान्निमज्य तस्यां विद्याधरसुरसमूहविनुतायाम् ।
सोऽयं तस्यास्तोयं पायं पायं श्रमेण रहितोऽभूत् ॥१८॥
सुवर्णमुखरीजलोद्धतगतिं शिलोच्चयतटे विलोक्य स मुदा ।
विहङ्गमगणं निहन्तुमधिकं चचार किल तत्तटे धृतधनुः ॥ १९ ॥
नागात्मजस्तटस्थान् पूगाम्रपनसमुखान् समं सुहृदा ।
फलमालोक्य हि मुमुदे फलेग्रहीन् स लुपांश्च भूमिरुहान्
क्षितिधरस्य तदा शिखरे चिरात् स्थितिजुषो गिरिशस्य हि सन्निधौ
अतिबलं सुरनागसुकन्यका द्रुतविलम्बितमध्ययुतं जगुः ॥२१॥
नागवरालिमुखारिमुखान्तां रागवरालिमयं तु निशम्य ।
नागसुताततिकन्धरजातां नागसुतस्सुहृदन्तमुवाच ॥ २२ ॥

मित्र त्वया रवोऽयं कुत्रत्य इति सुविचार्यतां क्षिप्रम्।
गाढं श्रुततद्वाक्यो गाढतराङ्गस्स धीरमिदमूचे ॥
आववरेऽस्मिन्किञ्चित् दैवतमास्ते मया पुरा दृष्टम्।
इत्थन्तत्र कुशाङ्ग्यः कत्थन्ते करगृहीतकाष्ठा हि ॥

स वाचं समाकर्ण्य गाढस्य धीरो भवान्देवता दर्शयत्वित्युदीर्य।
तमारोहणैरारुरोहाऽमुनाऽद्रिं समाधिं यथा योगिवर्यो यताद्यैः
गोत्रस्य तस्याऽयमधित्यकायां नेत्रस्य सन्तोषकरन्ददर्श ।
नाकालयैर्रचितमीशलिङ्गं श्रीकालहस्तीश्वरनामधेयम् ॥
पुलिन्दनाथाऽऽत्मजश्चित्तवृत्तिरलिन्दचिन्तामणिमानतानाम्।
सारङ्गपाणिन्दृढमालिलिङ्ग जारं पुमांसं वनिता यथैव ॥
सोऽभिवाद्य गिरिशं शतकृत्वो नाभिजन्मविनुतम्मुदितोऽसौ।
शोभितश्च पुलकैश्शिवमस्तौषीच्छरण्यमव मां गिरिशेति ॥

ततस्स सुहृदं सुधीस्तमवदन्न्यधात्कस्सखे !
चयं सुमनसामिमं सुमनसां प्रभोर्मस्तके ।
नि·········न्त्विदं गिरिशमर्चयिष्याम्यमुं
प्रसूननिकरैर्नवैरिति तदाऽवदत्सोऽप्यमुम् ॥

मद्वचनं श्रृणु प्रिय मृगयार्थन्त्वत्पित्रा समं समागतेन मया पूर्वमत्र दृष्टः कश्चित, स तावत् तन्तुत्रययुक्तन्दाम वामांसे वहन् अम्बहमिहागत्य सुवर्णमुखर्यम्भसा कुम्भस्थितेन शंभुमेनमभिषिच्य प्रत्य-

प्राणि बिल्वपत्राणि विविधानि पुष्पाणि चाऽस्य मस्तके हस्तेन निक्षिप्य, अन्नपात्रञ्चाऽस्य पुरतो निधाय मन्दं किमपि जल्पन्, दक्षिणहस्तञ्चाऽस्मै दर्शयित्वा, अनन्तरं गृहीतान्नपात्रस्सन् स्वकीयभवनं प्रविशति ।

मा याहि तत्र महती किल देवतेयं
छायान्तवाऽपि न सहिष्यत एव नीचाम्।
एकन्त्वमेव शवराधिपतेरपत्यं
साकम्मया तदधुना पुरमेहि धीर ॥

बोधितस्त्वेवमेतेन सोऽधिकं सुहृदा तदा।
एधितेश्वरभक्तिस्तं व्याधनाथसुतोऽब्रवीत् ॥

यस्मादिदं भूमिधरे सदाऽऽस्ते तस्मादरण्यक्षितिभृद्वराणाम् ॥
अस्माकमिष्टप्रददैवतं हि कस्मात् त्वमेवं प्रिय भाषसेऽद्य ॥
अत्र मेऽद्य रमते मनो भृशं तत्र किञ्चिदपि नैव मन्दिरे ।
सत्रशत्रुरयमेव मे पिता मित्रबन्धुजननीगृहाण्यपि। ३३।

शवरतनयवाक्यं गाढ आकर्ण्य तूर्णं
निजनगरमगच्छन्नाणनाम्ना च साकम्।
निखिलमिममुदन्तन्नागमेत्याऽयमूचे
स च निजतनयेऽस्मिन्हीनवाञ्छो बभूव ॥ ॥

तदनु तमूचे धीरो मदनारिपोर्भृशभयंकरे विपिने।
एकाकी वससि कथं लोकाधिप तव न किं भटः कोऽपि ॥

अङ्गीकुरुष्व मान्दासं त्वङ्गीर्वाण प्रभुः किल ।
देहोऽसावर्पितस्तुभ्यम्मोहो मे माऽस्तु मन्दिरे ॥
एवं संप्रार्थ्य गौरीपतिमथ विपिनं प्राप्य हत्वा मृगादीन्
तेषां मांसानि सम्यक् छवरपतिसुतो वह्निपक्वानि कृत्वा
एतान्यास्वाद्य पूर्वं स्वयमतिमधुरं यद्यदेतेषु तत्त—
च्छम्भ्वाहाराय रम्भादलपुटपटलेष्वादरान्न्यक्षिपत्सः ॥
धीरस्सुवर्णमुखरीनीरे पातकमहीध्रकुलिशेऽसौ ।
मज्जनमकरोद्धीमान् सज्जनवचस्सुमान्यथागृह्णात् ॥
दक्षिणवामकराभ्यां पक्षिमृगपिशितशरासनौ धृत्वा ।
कृत्वाऽऽस्याञ्जलिपूर्णं बद्ध्वा कैश्यं सुमान…………
सोपानत्प्रपदेन मस्तकगतं श्रीकालहस्तीशितु—
र्निर्माल्यं स निरस्य नागतनयो गण्डूषतोयैरमुम ।
विप्रेन्द्रा ! अभिषिच्य कैशिकगतैस्तं पूजयित्वा सुमै—
रेतद्भुङ्क्ष्व शिवेति तस्य निदधे वक्त्रे मनागामिषम् ॥
पिषितम्मधुरम्मधुना सहितं सशिवस्तदयन्न यदा बुभुजे ।
शशिशेखरदासवरस्स तदा विशिखार्दितवद्विमना अवदत् ।
मायूर मांसमेतच्छुकपिशितमिदं देव कापोतमेत—
द्वाराहं मांसमेतद्घृतमधुसहितं मांसमैणेयमेतत् ।
एते मत्स्यास्सुपक्वाश्शिव बहुमधुरा भुङ्क्ष्व सर्वं दयाब्धे
नोचेद्भुङ्क्ष्व त्वमेतद्गिरिवरशिखराद् द्राक्पतिष्यामि सत्यम्
एवमुक्त एष तेन भक्तवत्सलस्तदा
देवदेव आस्यवर्ति भुङ्क्ष्व तत्तदाऽऽमिषम् ।

यावदाहृतं सुपक्वमामिषं पृथग्विधं
तावताऽप्यभोजयत्स ईश्वरं मुनीश्वराः ।
विधुभूषैतत्सर्वं मधुरं वा शिव न वेति पृच्छन्तम् ।
शशिशेखरस्स खादन् स्वशिरः कंपादुवाच साध्विति तम्
मेने तत्पादरक्षायुतपदहननं स्कन्दपादप्रहारं
मेने गण्डूषतोयं स्वशिरसि पतितं स्वर्णदीपूततोयम् ॥
मेने तत्केशभक्तं कुसुममपि तदा हेमपुष्पम्मुनीन्द्राः
मेने तद्भुक्तशेषं पिशितमयमहो आध्वरं हव्यमेव ॥
अतुहिनकिरणस्तत्पाशिने नागसूनो—
श्चरितमिव विवक्षुः पश्चिमाब्धौ ममज्ज ।
निशि स विधुतनिद्रो ह्यस्तशर्मस्समीपे
धृतधनुरिव पूर्वं लक्ष्मणो रामपार्श्वे ॥ ४६ ॥
स तु शबरपतेः सुतः प्रभाते विपिनमगाद्विविधान्मृगाञ्जिघांसुः ।
अथ खलु शिवकोशनामधेयशिवभवनं गतवाञ्छिवद्विजाग्र्यः ॥

तत्र गौरीनाथलिंगं सवेदिकं पिशितैस्सुदूषितं पूतगन्धि, वायसैः कङ्कैश्च विष्वक्समावृतं श्वापदैश्चावृतं संविलोक्य, हा हतोऽस्मीति स्वहस्तेन मस्तकञ्जठरञ्च संताड्य कोऽयम् यश्चकारैवं स यास्यत्यहो यमं किं करिष्यामीति किल विलप्य । तदनु दूरतो मांसानि तानि कृत्वा, साधु संप्रोक्षणादिकं कर्म कृत्वा, भुजगभूषं यथापुरं पूजयित्वा, स्वीयमागान्निकेतनं स भृशदुःखी ।

भृत्य एष नु शंकरस्य स सायमेत्य शिवान्तिकं
स्तुत्यमब्जभवादिभिस्तमभोजयद्भृशमामिषैः ।
इत्यमुष्य वितन्वतः किल घस्रषट्कमभूद् गतम्
प्रत्यहं फलमर्चकोऽपि स दूरतो विदधे शुचा ॥ ४८ ॥
कस्मिंश्चिद्वासरेऽथो पशुपतिभवनं प्राप्य तत्राऽर्चकोऽयं
दृष्ट्वा मांसानि दुःखात् त्रिणयनमवदृच्छ्रंभुदासावतंसः ।
शम्भो! दग्धास्त्वया ते पुरमदनमुखाः किन्न दग्धः खलोऽयं
स्वस्तन्दुष्टं हनिष्याम्यहमिति स रुषा गच्छतिस्म स्वगेहम् ।
नक्तं गिरिजाजानिर्भक्तं स्वप्ने जगाद शिवकोशम् ।
आराधयति भृशं मां धीराख्यः किल निषादपतिपुत्रः ॥
यावान्स्नेहो धीरे तावान्मम नहि नगेन्द्रतनयायाम् ।
तद्द्वेषी यः पुरुषो मद्द्वेषी स हि पुलोमजेशोऽपि ॥५१॥
धीरभक्तिं परान्दर्शयिष्यामि ते दूरतो मद्गृहे श्वो भवांस्तिष्ठतु ।
क्रूरधर्मेत्ययं शंभुरुक्त्वाऽर्चकं मारपातङ्कपञ्चाननोऽन्तर्दधे ॥
उत्थायाऽसौ सपदि गिरिजाजानिवाक्यन्त्वभीक्ष्णं
स्मारं स्मारं तदनु निशि नो अर्चकः प्राप निद्राम् ।
अन्येद्युस्तं मदनमथनं पूर्ववत्पूजयित्वा
तत्रै कस्मिन्विटपिविटपे तिष्ठतिस्माऽतिगूढः ॥ ५३ ॥
निषादतनयस्तथा पुररिपोस्समैत्याऽऽलयं
विलोक्य बहु शोणितं स्मरहरस्य वामेक्षणे ।

अमुष्य समभूद् दृशो गद इति प्रकामं शुचा
निकृत्य नयननिजं स इषुणा न्यधात्तद्दृशि ॥ ५४ ॥
धीरो धीमान् रुधिरमधिकं दक्षिणेऽप्यस्य नेत्रे
दृष्ट्वा दुःखात् स निजमपरं लोचनं छेत्तुकामः ।
लक्ष्यज्ञानं कथमिति तदा चिन्तयित्वाऽऽत्तबुद्धिः
पादाङ्गुष्ठं सपदि निदधे शम्भुनेत्रप्रदेशे ॥५५॥



अजामिलचरितम्

सकलपाप्मनामेकनिष्कृतिं शुक ! वदेत्यलं प्रश्नकारिणम् ।
स करुणानिधिर्बादरायणिस्त्वकथयत्तदा राजसत्तमम् ॥१॥

हरिनामैकशरणा निरघा यान्ति केशवम् ।
श्रुति "ध्रुवासो अस्ये" ति क्षितिपाल ! हि गर्जति ॥२॥

न तु तथा निहन्त्येनसां गणं व्रततपोनदीमज्जनादिकम् ।
क्षितिपतेऽवशादुक्तमप्यहो बत हरेर्यथा नाम मुक्तिदम् ॥३॥

दुरितकारिणं भूतले नरं हरिपराङ्मुखं सर्वनिष्कृतिः ।
परिपुनाति नो मेदिनीपते । सरिदिवाऽशुभं मद्यभाजनम् ॥४॥

अत्रेतिहासं वक्ष्यामि सावधानमनाश्शृणु ।
पठतां शृण्वतां भक्त्या सर्वपापहरं शुभम् ॥५॥

कन्याकुब्जाऽभिधपुरवर्ये कश्चिद्विप्रोऽजनि नृप ! पूर्वम् ।
विख्यातोऽजामिल इति लोके विद्वद्वर्यो विमलतराऽऽत्मा ॥६॥

एष भूमिनिर्जरः कस्यचित्कन्यकां भूषितां सद्गुणैरुद्वहन्सुन्दरीम् ।
पूपतुल्याकृति स्वाश्रमस्योचितं दोषभीत्यसदा कर्म चक्रे शुभम् ॥७॥

स तु जातु पितुर्निदेशतो विपिनं गतवान्समिदाहरणार्थमयम् ।
ऋतुभुग्वनितासदृशीं गणिकां पथि कामपि वीक्षितवान् चतुराम् ॥८॥

भूमिविबुधो भृशमवेक्ष्य वरदासीं कामशरविद्धहृदयः सुचपलात्मा
होमानयमादिकमशेषमपि हित्वा तामयमभेजत नृप ! तद्भवनवासी

शीलवतीं प्रविहाय स भार्यां बालमतिः पितरावपि वृद्धौ
चेलधनादिकचौर्यविधायी पालयति स्म तदन्नभुगेनाम् ॥१०॥
घोराघकर्तुर्दश तस्य तस्यां वाराङ्गनायां तनया बभूवुः ।
नारायणाख्यं चरमं स पुत्रमासात्स्थितं लालयति स्म नित्यम् ॥

इति स चिरमधात्मा तत्र वासं वितन्वन्
भृतितनुसुतदूतान्प्रेक्षमाणोऽन्त्यकाले ।
अतिचकितमतिस्सन्नाजुहाव स्वपुत्रं
प्लुतयुतमतिदुःखादेहि नारायणेति ॥१२॥

नामकीर्तनमस्मदीशितुरेष चक्र इति द्रुतं
सोमसन्निभशंखचक्रधरा रमेशभटास्तदा
भीमपाशगणैरिमं प्रविकर्षतो यमकिंकरान्
क्षमाऽमरं प्रविमुञ्चतेति निवारयन्ति रुषा स्म तान् ॥१३॥

ते तदा रमासहायपार्षदैर्निवारिताः
प्रेतराजकिंकरा वचोऽब्रुवन्विलोक्य तान् ।
एतमंहसान्निधिं द्विजं किमर्थमादरा—
त्पातुमिच्छथाऽद्य यूयमम्बुजाक्षकिंकराः ॥१४॥
इत्युक्ता यमदूतैस्ते प्रत्यूचुर्हरिपार्षदाः ।
भवन्तोऽस्य न जानन्ति महत्पुण्यं द्विजन्मनः ॥१५॥

एतेन सर्वपापानां प्रायश्चितं कृतं ध्रुवम् ।
नारायणेति यत्प्रोक्तं स्वपुत्राह्वानकारणात् ॥१६॥
प्रायश्चित्तशतानां भूयः श्रेष्ठं रमेशनामैव :
दोषं हन्ति यदखिलं "त्वेषं ह्यस्ये" त्यहो श्रुतिर्वदति ।१७
हेति रेति वा नरेण येति णेति वा शुभं
गीतमेकमक्षरं निहन्ति पातकायुतम् ।
पूतमेष तत्तु नाम पूर्णवर्णमुक्तवान्
पातकाद्विमुक्त एव नास्ति संशयोऽत्र वै ॥१८॥
आशया गुरुकलत्ररतो वा गोशतक्षितिसुरायुतहा वा ।
ईशनाम मनुजः सकृदुक्त्वा नशयत्यखिलपापसमूहम् ॥१९॥
विद्यतेऽत्र यदि संशयो मनागद्य पृच्छत यमं हरिप्रियम् ।
इदमेष हरिनामवैभवं सद्य एव स हि वक्ष्यतीदृशम् ॥२०॥
एवं निराकृतास्सर्वे हरिदूतैर्यमानुगाः ।
धर्मराजान्तिकं गत्वा सर्ववृत्तान्तमब्रुवन् ॥२१॥
कमलापतिभटमोचिततनुरेष तु नृपते !
विमलो ह्यथ स विहाय च भवनादिकमखिलम् ।
अमरोत्तमतटिनीतटमुपगम्य सुविमलं
समकीर्तयदिति केशवमखिलेश्वरमनिशम् ॥२२॥
नारायण ! माराभशरीराऽमलकीर्ते !
क्षेमावह ! नामाहृतभीमाघशतार्ते !

कंसासुरहिंसाकर ! पुंसां वर ! विष्णो !
यक्षाऽमरलक्षार्चित ! रक्षाऽऽशु हरे ! माम् ॥२३॥
एवमेव हरिनाम सुगर्जन् पावनं नृप ! विहाय वपुस्स्वम् ।
पावकाभमधिरुह्य विमानं देवमृग्यमगमद्धरिलोकम् ।२४।
पुण्यं येऽजामिलसुचरित्रं श्रृण्वन्तीदं नृपवर ! गुह्यम् ।
त्यक्ताऽघौघा मनुजवरास्ते पूज्यन्ते श्रीमुररिपुलोके ॥२५॥
श्रीतपस्तीर्थनिलयः पुत्रस्सप्तर्षिशाखिनः ।
रामस्वामी चकारेमामजामिलकथां शुभाम् ॥२६॥



ध्रुवचरितम्

पप्रच्छुः पुनरेतं, विप्रवरेण्याः परश्शताः सूतम् ।
श्रुत्वानघं ध्रुवचरितं पाह्यस्मानिति स चाकथयदेवम् ॥१॥
तापससिंहाः ! शृणुत श्रीपतिविभवं मनाक् प्रवक्ष्यामि ।
कृष्णो ह्यनन्तसुगुणो "विष्णोर्नु कं" मिति वदत्यहो वेदः ॥२॥
उत्तानपादनामा वित्ताधीश्वरसमोऽभवत्कश्चित्
नृपतिः सुनीतिसुरुची उपयेमे हरिरिवेन्दिरात्रसुधे ॥३॥
चित्तजतुल्यमथो ध्रुवसंज्ञं कृत्तमदा हि सुनीतिरसूत ।
उत्तमनामसुतं सुरुचिस्तौ मत्तगजेन्द्रगती ववृधाते ॥४॥
मोहासक्तः स सुरुचेः काष्ठापालसमो नृपः ।
श्रेष्ठामखिलसाध्वीनां ज्येष्ठां पत्नीमुपैक्षत ॥५॥
ज्ञात्वात्मजं स राजा नीत्वा निजमङ्कमुत्तमाभिख्यम् ।
परिरभ्यामुमतुष्यद्धरिरभ्याशं सुतं जयन्तमिव ।
स तदानीं ध्रुवसंज्ञः द्रुतमायातः निजांकमारोढुम् ।
सुकुमारं दृष्ट्वाऽपि स्वकुमारं किल नृपोऽभवत्तूष्णीम् ॥
तदा तु भृशगर्विता सुरुचिरेनमूचे ध्रुवं
वचान्तरस्खलैर्भवांस्तनयतां गतस्त्वंमम ।

तदाऽपि सुखमीदृशं बहु भवेत्सुनीतेस्सुतो,
ममात्मज इवाऽधुना ध्रुव ! सुखं कथं वाञ्छसि ॥८॥
मां चमानायकीं विद्धि काङ्क्ष मा सुखमीदृशम् ।
तां चरणात् व्रज दुर्भाग्यां त्वां त्वज्जीवतं युवाम् ॥९॥
अरुंतुदमिदं वचः स सुरुचेर्ध्रुवो बालका
निशम्य विमना गतः स्वजननीं रुरोदोच्चकैः ।
किमर्थमधुना भृशं तनय ! रोदिषीति प्रसूः
अपृच्छदनघो ध्रुवो निखिलमत्यवोचत्तदा ॥१०॥
निष्ठुरवचस्सपत्न्यास्सुश्रुत्वा, सा सुनीतिराकर्ण्य ।
धरणौ निपत्य दुःखात् सुरवनिताभा चिरेण विललाप ॥

ततः सुनीतिर्नीतिरहितया तया अत्यर्थमर्थकृत्या सुरुच्या आत्तगर्वं ध्रुवमेवमुवाच —तया यदुक्तं वत्स ! तत्समस्तमपि सत्यमेव। आवाभ्यां पूर्वजन्मसु गीर्वाणसार्वभौमः कौमोदकीधरस्सकृदपि न कृतपूजः । तस्य विहितक्षेमाणि नामानि च न कीर्तितानि । दुरितहरणानि तच्चरितानि च न श्रुतानि तस्मादस्मत्कृतेन मन्तुना संपादितं दुःखं क्षन्तव्यमेव ।
भज विष्णुं भज विष्णुं

सकलमनोरथसिद्ध्यै पुत्र ! भज विष्णुं भज विष्णुं
विधिराश्रित्योदारं विष्णुं भेजे सृष्ट्यधिकारं – पुत्र !
तं कुचेलोऽमरवर्यं स्मृत्वा लेभे महदैश्वर्यं पुत्र !
पितृपीडितं प्रह्लादं बालं हरिरकरोत गतखेदं पुत्र !
भज विष्णुं भज विष्णुं

अरण्यान्तमासाद्य युक्तं मुनीन्द्रैस्सरण्या मुनिप्रोक्तयाऽऽराधय त्वं
हिरण्याक्षहन्तारमंभोरुहाक्षं धरण्यादिकं स प्रदास्यत्यमोघम्

इति मात्रोक्तस्स वनं प्रति गच्छन् पथि ननाम त्रिदिवमुनिम्
स प्रणतं विधितनयः पप्रच्छ हि सिंहसंहननमेनम् । १३ ।

एकाकी विपिने त्वं शोकाकीर्णः किमर्थमायासि ।
माता का जनकः को भ्राता कस्तव यथातथं कथय १४।

पृष्ट इदं परमेष्ठिसुतेन स्पष्टमयं स्वमभीष्टमुवाच ।
हृष्टमनास्स निशम्य वचस्तत् धृष्टमुवाच परीक्षितुमेनम् ॥

ऋक्षतरक्षुमुखा वनमध्ये लक्षमहो निवसन्ति सदेति ।
दक्षमिदं स वदन्तमवोचत् तत्क्षणमेव भयं मम नेति ।१६।

अथ पृच्छति स्म स मुनिं कथमाराध्यो हरिः स किंरूपः
किंवस्त्रः किंशस्त्रस्त्वं वद निखिलं दयासमुद्रेति ॥१७॥

पङ्कजासनपुत्रोऽसौ संकटं तस्य मोचयन् ।
तं कराभ्यां समाश्लिष्य शंकराभोऽभ्यभाषत ।१८।

जैवातृक❀ स्त्वं भव राजसूनो ! जैवातृकाभास्य× वनं प्रविश्य ।
वैकुण्ठनाथं मनसा स्मरार्यं वैकुण्ठनामानि❀च गर्ज नित्यम्

ब्राह्मणादिसमस्तानाम्नामैव शरणं हरेः ।
"मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते" इत्येषा श्रुतिर्गर्जति बालक ॥२०॥

* जीर्णायुष्मान् × चन्द्रवद्भासमानवदन ! ❀ हरेर्नामानि

दासेष्टदस्स भगवानासेचनको दृशां घनश्यामः ।
पीतांबरवरधारी शीतांशुश्वेतशंखचक्रधरः ॥२१॥

नन्दकशार्ङ्गगदाभृत् सुन्दरवचनो रमेश इत्युक्त्वा ।
सः क्षिप्रन्तच्छिरसि प्रक्षिप्तकरं प्रसादमातेने ॥ २२ ॥

प्रसादितस्तेन सुरर्षिणा द्विजा ! असावरण्ये यमुनातटाश्रिते
स कन्दमूलोदकमारुताशनो मुकुन्दसेवां कुरुते स्म बालकः ।२३।

धातुः पुत्रस्तु धीमान् गृहमवनिपतेरेत्य तत्रातिखिन्नं
स्मारं स्मारं ध्रुवं तं स्वरचितमसकृत् कर्म निन्दन्तमेनम् ।
त्वत्पुत्रो भूप भूतिं दिविषदसुलभां प्राप्य विष्णुप्रसादा—
दायास्यत्येव शीघ्रात् ध्रुव इति धरणीपालमुक्त्वागमत्खम् ।

तत्तपसो विघ्नार्थं वित्तपतिमुखा ध्रुवस्य नेदिष्ठाः ।
ननृतुः पिशाचरूपास्स नृपतिपुत्रो न साध्वसं भेजे ॥२५॥

धृतिमतोऽस्य मानाथसेवनं कृतवतो गते मासषट्के ।
यतिगतिर्हरिस्तस्य हृद्गतः क्षितिपतेस्सुतस्याग्रतो बभौ ॥२६॥

दृशा तं विलोक्य प्रणम्यातिबालश्शशाकैष न स्तोतुमाम्नायवेद्यम्
निशानायकाभेन शंखेन विप्राः ! स शार्ङ्गी तदा तस्य पस्पर्श वक्त्रम्

विद्यया सर्वथा हृद्ययासेवितः सद्य एवाऽच्युतं विद्युदाभांबरम् ।
पद्यगद्यैरयं वर्णयामास तं नद्यधीशात्मजाजानिरागान्मुदम्

हरिः समधिरोप्य तं नृपसुतं निजांकं मुदा
क्षितिं त्वमखिलामिमामव चिरं ममाज्ञां वहन् ।

ततो विधिपदोपरि स्थितिमहं प्रदास्यामि हे
ध्रुवेति भगवानहो समभिधाय सोऽन्तर्दधे ॥ २९ ॥
नाकिनिभं तं पुरमुपयान्तं नहि किल कश्चिन्नृपतय ऊचे
सूक्तिकलापं स तु वहतेऽस्मै मौक्तिकमालामतिमुदितोऽदात् ।३०।
अभिपततिस्म नृपः सह पौरैरभिनवतामरसाननमेनम् ।
अथ पितरं मतिमान स तु नत्वा रथमधिरुह्य ययौ निजगेहम् ॥
अमुमलमवलोक्य गौरीनिभा प्रमुदितवदना सुनीतिर्बभूव ।
स तु धरणिपतिः स्वराज्ये द्विजा ! अतुलविभवमभ्यषिञ्चत् ध्रुवम् ।
किरीटसुकुण्डलमौक्तिकदाममुखाभरणार्चित एष चिरेण ।
भुवं परिपाल्य महानथ शक्रविधातृपदोपरिधाम जगाम ।३१।
पुष्करतल्पक❀दासवरेण्यः पुष्कर × चारुनुतः कनकाद्रौ ।
पुष्कर❀तुल्यदृशा सह मात्रा निष्कविभूषितया ध्रुव आस्ते ॥
श्रीतपस्तीर्थनिलयः पुत्रस्सप्तर्षिशास्त्रिणः ।
रामस्वामी चकारेदं ध्रुवस्य चरितं शुभम् ॥ ३५ ॥

❀ जलशायी विष्णुः, + सूर्यः ❀ कमलम्



विद्याधरचरितम्

ईहाऽस्ति मे शङ्कर ! रामनाममाहात्म्यभूरिश्रवणे वदैतत् ।
नीहारशैलाऽऽत्मजयेति पृष्टः स्माऽऽहाऽयमेवं रजताऽचले ताम् ।
काशीस्थलेऽहं कृतनित्यवासः कर्णेऽखिलानां कलयेऽन्त्यकाले ।
नामोपदेशं रघुनायकस्य ते मोक्षमृच्छन्त्ययि गौरि ! तस्मात् ॥
आराममीक्षस्व दृशाभिरामं गीरामणीयाढ्यपिकाढ्यमेतम् ।
हे राम इत्यादि वदन् प्रियं स्वां नारायणस्थानमपाप पतिः ।३।
इतिहासं शृणु पार्वति ! पुण्यमत्र इह परसौख्यकरम् ।
अतिरुचिरे कश्चिदवन्तीविषये पुरा
क्षितिविबुधो बभूव श्रोत्रियवंशे पुण्ये ॥
इतिहासं शृणु पार्वति ! पुण्यमत्र इह परसौख्यकरम्
विद्याधराभिधानो—विविधामाम्नायमुख्याम्
विद्यामधीत्याऽभवदितो यथार्थनामा ।
इत्थां कामपि कन्यां हेमवर्णामुदूह्य
सद्यो विधाय यज्ञं स ररक्ष वह्नित्रयम् ॥
इतिहासं शृणु पार्वति ! पुण्यमत्र इह परसौख्यकरम् ॥
क्षितिविबुधोऽयं गौरि ! जातु पाषण्डजनैः—
श्रुतिमार्गदूषकैस्साकं विधाय सौख्यम्
मतिरहितः स्वधर्मानखिलानपि सन्त्यज्य
रतिपतिशरार्दितो वेश्यापतिर्बभूव ॥
इतिहासं शृणु पार्वति ! पुण्यमत्र इह परसौख्यकरम् ॥

भ्रातरस्तस्य धनं प्रविभज्य दत्वा तस्मै
वीतस्नेहा बभूवुर्वेददूषके तस्मिन् ।
पातकी सोऽथ दास्यै प्रददौ धनमखिलं
सा तद्वित्तं प्रगृह्य समत्यजदेनं दासी ॥
इतिहासं शृणु पर्वति ! पुण्यमत्र इह परसौख्यकरम् ॥
क्षितिसुरस्त्वथ क्षीणवित्तको रतिमयं स्वया रामयाऽकरोत् ।
अतिरुजा तदा पीडिता सती गतिमियं परां गच्छतिस्म सा ।४।

तदनु धरणिदेवश्चिन्तयन्नित्यमेनां
मदनविशिखविद्धो भ्रान्तचित्तस्स भूत्वा ।
अयि भृशमभिरामे ! काऽसि रामे ! ममेति
प्रकटितनिजदुःखो नित्यमूचेऽद्रिकन्ये ! ॥ ५ ॥
भूतले तु सञ्चरन्स भूमिनिर्जरश्चिरं
शीतदृष्टिबिम्बवक्त्ररामनामवैभवात् ।
पातकाभ्रमण्डलप्रभञ्जनायितः परं
वीतरागगम्यमाप मोक्षमद्रिपुत्र्यहो ॥ ६ ॥
किंकरास्तदा यमस्य विष्णुगेहमागताः
पंकहीनमत्र तत्र वीक्ष्य मोक्षगामिनम् ।
शंकिताः पुनर्निवृत्य संयमिन्यधीश्वरं
कंकणादिभूषितं प्रणम्य सर्वमूचिरे ॥ ७ ॥

तत्र दूतभाषितं निशम्य धर्मराडयं
चित्रगुप्त ! तद्विचेष्टितं वदेति सोऽब्रवीत् ।
पत्रजालमाशु वीक्ष्य पण्डितस्स शैलजे !
मित्रपुत्रमित्युवाच मेघनिस्वनस्तदा ॥ ८ ॥
धर्मराज ! शृणु पापं तद्द्विजकृतं ! धर्मराज ! शृणु पापम् ।
जन्मप्रभृति द्विजेन पापमेव कृतं तेन
मन्मथशरार्दितेन मत्सरादिसहितेन—
धर्मराज ! शृणु पापं ! तद्द्विजकृतं धर्मराज ! शृणु पापम् ।
दासीगमनं द्वादशाहाशनञ्चक्रे ।
मासिकभोजनञ्चक्रे मद्यपानमपि चक्रे ।
धर्मराज ! शृणु पापं तद्द्विजकृतं धर्मराज ! शृणु पापम् ॥
प्रेतभोजनं स चक्रे ब्राह्मणदूषणं चक्रे
सूतकवर्जनं चक्रे शूद्रस्त्रीगमनं चक्रे ॥
धर्मराज ! शृणु पापं तद्द्विजकृतं धर्मराज शृणु पापम्
रजकस्त्रीगमनं चक्रे रजतस्वर्णस्तेयं चक्रे
निजधर्मवर्जनं चक्रे निगमविक्रयं चक्रे ॥
धर्मराज ! शृणु पापं तद्द्विजकृतं धर्मराज शृणु पापम् ॥
इति गणकमुखोक्तं वाक्यमाकर्ण्य सर्वं
द्युतिपतितनयो द्राक् चित्रगुप्तेन साकम् ।
सरसिजभवगुप्तं सत्यलोकं स गत्वा
सुरविनुतमजं तं संप्रणम्येदमूचे ॥ ९ ॥

विद्याधरोऽपि घोराघकृद्याति यदि सोऽमृतम् ।
को वा मल्लोकभाक्कि मे हेवाणीशाधिकारतः ॥ १० ॥
धर्मराजवचश्श्रुत्वा ब्रह्मा तं वाक्यमब्रवीत् ।
रामभक्तस्स मोक्षार्हस्त्वयानर्होऽयमीक्षितुम् ॥ ११ ॥
श्रीरामनाममाहात्म्यं सुराऽऽत्मज ! न वेत्सि किम् ।
ते वक्ष्याम्यत्र तत्किञ्चित् सावधानमनाश्शृणु ॥ १२ ॥
कामतो गुरुकलत्रगोऽपि वा भूमिदेवशतकोटिहाऽपि वा ।
हेमचौर्यनिरतोऽपि वा सकृत रामनाम समुदीर्य मुच्यते ॥ १३ ॥
यागकोटिशतपुण्यदायकं रागलोभमदमोहभञ्जनम् ।
नागभूषमुखकीर्तनं सदा रोगहारि रघुनाथनाम हि ॥ १४ ॥
एतदब्जभववक्तृभाषितं प्रेतराट् स तु निशम्य शैलजे ।
ज्ञातदाशरथिनामवैभवो जातविस्मयमगात्पुरं निजम् ॥ १५ ॥
विद्याधरस्य चरितं शृणोति य इदं प्रिये ।
सर्वपापविनिर्मुक्तस्स याति परमां गतिम् ॥ १६ ॥
सोमशेखरेण तेन शंकरेण कीर्तितं
रामनामवैभवं निशम्य सा सुविस्मिता ।
रामरामरामरामराघवेति सन्ततं
नामकीर्तने कृतादरा बभूव पार्वती ॥ १७ ॥

मार्कण्डेयचरितम्

चरितं मृकण्डसूनोर्दुरितहरं वद मुनीन्द्र ! दययेति ।
पृच्छन्तं तु दिलीपं स्वच्छमतिः किल वसिष्ठ इदमूचे ॥ १
मृगशृंगमुनेः पुत्रो जगति ख्यातो मृकण्डुरित्यासीत् ।
तपसि स्थिते तु यस्मिन्नृप ! कण्डूतेश्शाम मृगाश्चक्रुः ॥ २
मुनिवरोत्तमो मुद्गलात्मजामनिमिषाबलासन्निभांसतीम्
स तु मरुद्वतीमुद्वहन्मुदा ऋतुमुखन्निजं धर्ममातनोत् । ३।
अनघा पतिं परिचचार सा सती विनयान्विता स्मितिपमञ्जुभाषिणी
मुनिकुञ्जरस्य खलु तस्य नाभवत्तनयस्स्वकीयकुलवृद्धिहेतवे ।४।
दारैस्साकं काननं तापसोऽसौ धीरैर्युक्तं योगिवर्यैरुपेत्य—
लोकाधीशं भक्तमन्दारमाद्यं तोकाप्त्यै१ पूजयामास शम्भुम्
महोच्चककुदि स्थितं गिरिसुतागुहाभ्यां युतं
वरस्फटिकसन्निभं द्युमणिकोटितल्पद्युतिम् ।
रवीन्दुनललोचनं वदनपञ्चकेनान्वितं
सुपर्वतटिनीधरं शशिकलाजटामण्डितम् । ६ ।
भुजंगवरभूषणं धवलभस्मसंरूषितं
पिनाकविलसत्करं विशिखधारिणं शङ्करम् ।

१ अपत्यः

शिलादतनयादिकैर्जयजयेति सम्यक्स्तुतं
ददर्श परमेश्वरं मुनिवरो मृकण्डुं किल ।७।

पंकजाद्यादिसंपूज्यपादस्तदा शङ्करः प्रीतचेतास्तमूचे मुनिम् ।
दुर्गुणं किं चिरञ्जीविनं पुत्रकं, सद्गुणं षोडशायुर्युतं वाञ्छसि

इत्युक्तः पशुपतिना प्रत्यूचे तं विमृश्य मुनिवर्यः ।
अल्पायुषमपि पुत्रं त्वत्पदांबुजयुगार्चकं देहि । ९ ।

महामतेस्तद्वचनं मृकण्डोर्महेश्वरोऽसौ नृपते ! विमृश्य ।
सुधीस्सुतस्ते भवितेत्युदीर्य विधीडितात्मान्तरधत्त तत्र ।१०।

पत्न्या साकं नृप ! मुनिवरे स्वाश्रमं याति तस्मि—
न्नन्तर्वत्नी ह्यभवदचिरादात्मजा मुद्गलस्य ।
कन्दर्पाभं तदनु सुषुवे पुत्रमेषा सुशीला
मार्कण्डेयं स च तमतनोदाख्ययाऽसौ मृकण्डुः ।११ ।

तदनु नन्दनमवर्धयत्सती त्रिदशतुल्यमनिशं प्रियंवदा ।
अथ मृकण्डुरपि पञ्चमेऽब्दके, विधिवदेनमुपनीतवान्मुनिः ॥

अथ तौ दंपती अनायासेनाऽभ्यस्तसमस्तविद्यासमवायस्य सौन्द र्यनिर्जितमारस्य कुमारस्य षोडशे वयसि संप्राप्ते दत्तपूर्वं पार्वतीरमणेन वरं तं स्मारं स्मारमपारशोकपारावारे निमग्नौ अश्रीक्ष्णमक्षिभ्यामश्रूण्यु त्सृजन्तौ नितान्तं परिदेवयामासतुः । मार्कण्डेयस्तदानीं दुःखिततरौ

पितरौ दृष्ट्वा युवामिदानीं किमर्थमत्यर्थं रूदिथ इति समर्थः पप्रच्छ । इत्थं तेन सुतेन पुनः पुनः पृष्टौ तौ सर्ववृत्तान्तमपि तस्मै यथातथं कथयामासतुः ।

इति स पितृभ्यामुक्तो मतिमानूचे शुचं युवां त्यजतम् ।
आराध्याऽहमुमेशं दूरात्कालं निवारयिष्यामि ॥ १३ ॥
तद्वचस्तौ समाकर्ण्य विद्वद्वर्यस्य शोभनम्
दंपती ऊचतुः पुत्रं तं पवित्रतमं मुदा ॥ १४ ॥

शंकरपूजनं सम्यक्पुत्र कुरुष्व सर्वाभीष्टसिद्ध्यै ।

पंकजभववन्द्यं शंभुं यो नार्चति ।
तं कालकिंकरा नरकेषु विक्षिपन्ति ॥
शंकरपूजनं सम्यक्पुत्र कुरुष्व सर्वाभीष्टसिद्ध्यै

गरुडवाहनः पुरा गौरीनाथमभ्यर्च्य ।
तरुणादित्यसंकाशं चक्राऽऽयुधं लेभे ॥
करुणासमुद्रं रुद्रं पूजयित्वा कुबेरो ।
गुरुतरमैश्वर्यं प्राप तेन सख्यञ्च ॥
शंकरपुजनं सम्यक्पुत्र कुरुष्व सर्वाभीष्टसिद्ध्यै
चण्डिकेशो गिरिशं क्षीरैरभिषिच्य.
चण्डितजनकोऽपि शिवपार्षदो बभूव ।

खण्डितपुरमीशं नन्दी च पूजयित्वा
पण्डितोऽगमच्छिवपार्षदनाथत्वम् ॥
शंकरपूजनं सम्यक्पुत्र कुरुष्व सर्वाभीष्टसिद्ध्यै

कुंभसंभवमुखा अन्ये बहवोऽपि
शंभुं समाराध्य स्वाऽभीष्टं लेभिरे।
डिंभसुकोमलैर्बिल्वदलैर्भक्त्या
दंभादिरहितस्त्वं प्रतिदिवसं त्रिकालम् ॥
शंकरपूजनं सम्यक्पुत्र कुरुष्व सर्वाभीष्टसिद्ध्यै

इति स तु नृप! बोधितः पितृभ्या—
मतिमुदितो मतिमानुभौ च नत्वा।
निटिलनयनपूजनं चिकीर्षु—
र्झटिति ययौ किल दक्षिणाब्धितीरम्। १५।

तदनु गिरिशलिंगं संप्रतिष्ठाय तस्मिन्
प्रणतसुखदमीशं पूजयामास सम्यक्।
विधिमुखसुरवन्द्यं तं परिक्रम्य नत्वा।
पुरहरमिदमस्तौत् भूप! पूजाऽवसाने। १६।

चन्द्रशेखर तव चरणयुगं भजे किं करिष्यति कालो माम् महादेव
इन्द्रमुखनिखिलवृन्दारकगणवन्दितचरणयुग महादेव

भूरथविविसूतसूरचन्द्ररथांग मेरुपर्वतकार्मुक
श्रीरमणसायक घोरत्रिपुरहर नारदमुखविनुत महादेव
चन्द्रशेखर तव चरणयुगं भजे
किं करिष्यति कालो माम् महादेव

कुक्षिस्थनिखिलाण्डरक्षणाय कण्ठे निक्षिप्तकालकूट
अक्षिजपावकशिक्षितमन्मथ दक्षमखविभञ्जन महादेव
चन्द्रशेखर तव चरणयुगं भजे
किं करिष्यति कालो माम् महादेव

सर्वजगन्नाथ सर्वत्र संपूर्ण सर्वजगत्कारण
गर्वरहितभुगनिर्वृतिदायक पर्वतजारमण महादेव
चन्द्रशेखर तव चरणयुगं भजे
किं करिष्यति कालो माम् महादेव

इत्थं पार्थिवभस्मभूषिततनो रुद्राक्षमालाभृत—
श्शंभुं पूजयतस्त्वमुष्य दिवसा याता अनेके किल।
कस्मिंश्चिद्दिवसे ततः पशुपतिं संपूजयन्तं मुनिं।
कालः प्राप्य हि पाशमस्य सुदृढं चिक्षेप कण्ठस्थले ॥
पाशनिबद्धगलोऽसावीशजनाम्रयः कृतान्तमिदमूचे।
मा कुरु विघ्नमिदानीं लोकपतेरस्य कालपूजायाः ॥१८॥

मोचय पाशान्मां त्वं नोचेत्त्वां यम विनाशयिष्यामि ।
इन्दुमुकुटभक्तानां किं दुष्करमपि तृणीकृतेन्द्राणाम् ॥१९॥
पुरहरभक्तं हन्तुं सुरपतिपद्मजमुखा अपि न शक्ताः ।
मार्कण्डेयमथ रुषा सोऽर्ककुमारो हसन्नुवाचेदम् ॥२०॥

न वेत्ति हि भवान्बलं मम हृतानि पृथ्वीभुजां
शतानि सुरराट्च्छतं विधिशतं मयैवाऽऽहृतम् ।
यमाश्रयसि शंकरं मम भयात्स पातित्यमुं ।
निगम नितरां जवाद्रविसुतश्चकर्षानघम् ॥ २१ ॥

मदान्धेन तेनाऽयमाकृष्टदेह-
स्तदा शांभवं लिंगमालिंगतिस्म ।
उदारात्मशक्तिः क्रुधा पार्वतीशः
पदाऽताडयत्तं यमं बाहुमध्ये ॥ २२ ॥

गौरीशपादाहतबाहुमध्य—
स्सौरी रवं काममसौ वितन्वन् ।
द्रागिन्दुमौलेर्निकटे पपात
प्रागिन्द्रवज्राभिहतो यथाऽद्रिः ॥ २३ ॥

स कालो मुहूर्तात समुत्थाय राजन्
प्रकामं विनीतो नमस्कृत्य शंभुम् ।

उमानाथ शम्भो स्मरारे पुरारे
ममाऽऽगस्त्वमेतत्क्षमस्वेत्युवाच ।
इत्ययं क्षमापितो यमेन तं शिवोऽब्रवी-
न्नित्यषोडशायुरित्ययं मयोदितः खलु ।
भृत्यवैभवं ममाऽद्भुतं न वेत्सि काल किं,
मृत्युगोचरोऽप्यहं हि तैर्वशीकृतोऽनघैः ॥२५॥

रविपुत्र मां भस्मरुद्राक्षधारिणो मृदुबिल्वदलैर्ये समर्चयन्ति, शंभो महादेव चन्द्रशेखर नीलकण्ठेति येऽपि मां कीर्तयन्ति, अतिदुःखसंसारहारिणीं मत्कथां शृण्वन्ति ये भृशं श्रवणसुखदाम्, यद्भक्तमपि नरं मत्समं मत्वैव तोषयन्त्यन्नवस्त्रादिकैर्ये, शमन मा गच्छ तेषां तु सन्निधानमिति स शंभुनाऽऽज्ञापितो धर्मराजः सम्यगेत नमस्कृत्य चन्द्रचूडं भूप संयमिन्याह्वयपुरमाप ।

मार्कण्डेयश्शंकरस्याऽऽज्ञया स्वं गत्वा गेहं सर्वमूचे पितृभ्याम् ।
भर्तुस्सेवाशालिनी तस्य माता तातश्चोभौ हर्षयुक्तावभूताम् ॥
नराश्शृण्वन्तीदं मुनिसुतचरित्रं जगति ये
शुभं रामस्वामिप्रविरचितमंहोगणहरम् ।
अशेषं ते लब्ध्वा सुखमिह शरीरान्त्यसमये,
विमानस्था यान्ति त्रिनयनसरूपाश्शिवपुरम् ॥



उत्तरवृत्तम्

रुक्माङ्गदस्य चरितं कस्मिन कस्मिन् पुराणे विद्यते इति न सम्यग्वक्तुं शक्तः। एतस्य चरितं रुक्माङ्गदचम्पौ यावद् वर्तते तावदेवास्ति वाऽन्यदपीत्यपि न वेद्मि, परमयमस्ति परमभागवत इति पाण्डवगीतायाः प्रथमश्लोकादवबुद्ध्यते। स चायम्—

प्रह्लादनारदपाराशरपुण्डरीक—
व्यासाम्बरीषशुकशौनकभीष्मदाल्भ्यान्।
रुक्माङ्गदार्जुनवशिष्ठविभीषणादीन्,
पुण्यानिमान परमभागवतान् स्मरामि॥

कविनाभादासविरचिते भक्तमालनामके हिन्दिपुस्तके रुक्माङ्गदस्य चरितमित्थमङ्कितं वर्तते—

रुक्माङ्गदमहाराजस्योपवनमत्युत्तममासीत। रात्रावेतस्मिन् विहरणाय स्वर्गस्त्रिय आगच्छन्ति स्म। इमां वार्तां महाराज्ञो वा वाटिकाध्यक्षो मालाकरो जानाति स्म न वा नेति वक्तुं शक्यते। एकदा प्रभाते राजोपवनं निरीक्षमाणेन मालाकारेणैका दिव्यरमणी वृक्षस्यैकस्याधोगता निरीक्षिता। तामवलोक्य ज्ञात्वा च दिव्याङ्गनां सौन्दर्यनिर्जितमाराङ्गनां महाराजरुक्माङ्गदमुपसृत्य, सविनयं प्रणम्योवाच देव! काचिद्दिव्याङ्गना राजोपवने सजोषं विराजते। महाराजस्तत्क्षणमेव तदन्तिकं

गत्वा सस्वागतवचनं तां सादरं पप्रच्छ—देवि! का त्वं, किम[illegible] कुत आगतेहेत्यज्ञातवृत्तं मां त्वदागमनं सहसा प्रसह्य प्रष्टुं मु[illegible]रयतीति क्षम्यताम्।

सोक्तवती—देव! दिव्याङ्गनाऽहं रात्रौ भवदुपवनविहरणार्थं परदिनमिवानेकसखीभिः सहागताऽत्र विहरन्ती वृन्ताककण्टकविद्धपादाऽपहृतोड्डयनशक्तिः सखीभिः परित्यक्ता मानुषसम्बन्धभीताभिरेकला स्वमुक्त्युपायमन्वेषयामि।

महाराजेनोक्तं देवि! महत्सौभाग्येनातिथ्यमागतायास्ते स्वगृहेऽपि चेदयं जनः सेवासुखवञ्चितस्तर्हि किमतः परं मानवजीवनस्यासाफल्यन्नाम? तदमुं जनं स्वाज्ञावशवर्तिनं मत्वाऽनुशाधि।

दिव्याङ्गनोवाच—महाराज! गतदिने हरिवासर आसीत्। पारणार्थमुद्यतस्याद्य कस्यचिज्जनस्य चेल्लभ्येत तदुपवासपुण्यं तर्ह्युड्डयनशक्तिं पुनरुपलभ्य स्वावासं गन्तुं समर्था स्याम्।

हरिवासरदिनं किमिति महाराजः पप्रच्छ।

सैकादशीत्युवाच।

महाराजरुक्माङ्गद उक्तवान् यदस्मद्राज्ये कश्चिदप्येकादशीव्रतं न जानाति, न च करोति।

दिव्याङ्गनोक्तवती तर्हि भवता गतदिनबुभुक्षितस्य कस्य[illegible]णाय चराः प्रहेयाः, सदुन्दुभिध्वानञ्चोद्घोषणीयं यद् [illegible] कृतानाहारो दिव्याङ्गनां स्वपुण्येनोद्धरिष्यति तस्मै [illegible]स्ये। स आशु राजोद्यानमागच्छेदिति।

अल्प एव समये कस्यचिद् वैश्यस्यैका दासी चरैरा—
। । इयं गतदिने प्रभाते केनचिदपराधेन वैश्यस्वामिना ताडि·
... दुःखिता, प्रकुपिता च दिवानिशं विहिताऽनाहाराऽतिष्ठत ।
इत्थमज्ञाततयैव हरिवासरे कृतोपोषणा सा तत्पुण्यं दिव्याङ्ग·
नायै समर्प्य तामुल्लघयाञ्चकार । महाराजो दासीं सर्वप्रका·
रेण सत्कृत्य वीतव्यथां विधाय दिव्याङ्गनाप्रसादेनैकादशीमा·
हात्म्यं विज्ञाय च स्वराज्ये प्रसारयामासेति ।

भक्तमाले रुक्माङ्गदमहाराजस्य कन्याया अपि चरितं
किञ्चिद् विद्यते । सर्वाङ्गसौन्दर्यसद्गुणालङ्कृताया अस्याः
पतिरेकदा श्वसुरालयमाप । कन्या सा सम्यक् पतिं परिचचार ।
ससुखं श्वसुरालये निवसतस्तस्य महाराजकुमारस्य समये
हरिदिनमायातम् । रुक्माङ्गदमहाराजस्य राज्ये यदा पशवो·
ऽपि, पक्षिणोऽपि नादन्ति स्म तदा मनुष्याणां का कथा ?
सङ्कुचितो जामाता समये भोजनमप्राप्य बुभुक्षयाऽऽकुलितः
पत्नीं ययाचेऽन्नं परं सा न ददौ, विचारयामास च हरिवासरे
तन्मृत्युमप्युत्तमम् । गमिष्यमाणे पतौ वैकुण्ठमनुगन्तुकामा सा
प्राणानायम्य यदैव शरीरं तितिक्षाञ्चक्रे तदैव भक्तवत्सलो
भगवान् सपतिकां तां स्वविमानेन वैकुण्ठं निनायेति ।

ा-
ाम-
महाराज
ाद्दिव्याङ्गना
ेव तदन्तिकं